संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला - (iii) 06

नवाब् अब्दुल् रहीम् खान् खाना प्रणीतानि

संस्कृतरचनानि

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना - अनुसन्धाता च

आचार्यः के नीलकण्ठः

निदेशकः

सम्पादकः

डा. शेख़् अब्दुल् ग़नी

सहायकः

डा. के वि सूर्यप्रकाशः

शोधसहायकः





संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला – (iii) 06

नवाब् अब्दुल् रहीम् खान् खाना प्रणीतानि

॥ संस्कृतरचनानि ॥

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादकः

डा. शेख़् अब्दुल् ग़नी

सहायकः

डा. के वि सूर्यप्रकाशः

शोधसहायकः





संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् – 07

2024

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 06

Saṃskṛtaracanāni
of
Navāb Abdul Rahīm Khān Khānā

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University
Hyderabad – 500 007

Phone & Fax:
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Saṃskṛtaracanāni
of
Navāb Abdul Rahīm Khān Khānā

ISBN – 978-81-969575-4-4

Year : 2024
Pages : xxii+51
Copies : 300
Price : Rs 300

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 06

Saṃskṛtaracanāni

of

Navāb Abdul Rahīm Khān Khānā

(Published under 'Re-printing of rare books project', Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor & Project Investigator

Prof. K. Neelakantham

Director

Editor

Dr. Shaik Abdul Ghani

Assistance

Dr. K V Suryaprakash

Research Assistant





Sanskrit Academy

Adarsha Sanskrit Shodha Sansthan

(Recognised by Central Sanskrit University, New Delhi)

Osmania University, Hyderabad – 500 007

2024

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 06

Saṃskṛtaracanāni
of
Navāb Abdul Rahīm Khān Khānā

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University
Hyderabad – 500 007

Phone & Fax:
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Saṃskṛtaracanāni
of
Navāb Abdul Rahīm Khān Khānā

ISBN – 978-81-969575-4-4

Year	:	2024
Pages	:	xxii+51
Copies	:	300
Price	:	Rs 300

॥ प्रस्तावना ॥

ओम् श्री गुरुभ्यो नमः

।।श्री शङ्करभगवत्पादाः विजयन्ते।।

संस्कृतवाङ्मयम्प्रति महम्मदीयराजानां कवीनां च योगदानम्-

प्रपञ्चेऽस्मिन् भाषाः तासां वाङ्मयानि च देश-जाति-प्रान्त-कालादि भेदान् सर्वान् विनिर्मूल्य लोके ऐकमत्यतां कल्पयितुं प्रभवन्ति। सर्वासामपि भाषाणां वाङ्मयं नीतिं बोधयति, सहृदयतां कल्पयति, दुर्वृत्तानि परित्यक्तुं प्रेरयति, लोके सर्वत्र शान्तिं सौख्यं च कल्पयितव्यम् इति निगदति, यद्यपि कुत्रचित् कासुचित् भाषासु केचन दुर्वृत्ताः कवयः समाजे अहितं वर्धयितुं प्रायतन्त प्रयतन्ते च तथापि प्रायः भाषाः सर्वाः "मानवाः सर्वे सम्भूय लोकहितार्थं यतध्वम्" इत्येवोद्घोषयन्ति।अस्मिन् विषये संस्कृतभाषायाः संस्कृतवाङ्मयस्य च दायित्वम् अनुपमानम्। विश्वेऽस्मिन् सर्वेष्वपि देशेषु नाना जातीयाः विपश्चितः संस्कृतभाषां श्रध्दया भक्त्या च आद्रियन्ते स्म आद्रियन्ते च वर्तमाने। **कर्ता कारयिता चैव प्रेक्षकश्चानुमोदकः** इत्युक्तवत् स्वयं ग्रन्थनिर्मातारः कवयः, तान् रचयितुं प्रेरयितारः राजानोऽपि, भाषायाः वाङ्मयस्य च सेवका एव। अतोऽत्र वयमिदानीं संस्कृतं प्रति महम्मदीयैः राजभिः कविभिश्च कृतां सेवां किञ्चित् परिशीलयामः।

द्वादश शताब्दौ स्थितस्य शाहबुद्दीन् इत्याख्यस्य महम्मदीयराज्ञः सभायां अमृतदत्तो नाम कविरासीत्। मीर् शाह नाम राजा कश्चन काश्मीरम् आक्रमितुम् आयातीति तस्मात्तत्र जागरूकता आवश्यकीति शाहबुद्दीन् भूपतिः अमृतदत्तम्प्रति लेखाम् अलेखीत्। अत्र अमृतदत्तकविना रचिताः श्लोकाः दृश्यन्ते[1]। क्रिस्तोः परं 1370 -1600 मध्यकाले स्थितस्य बर्हन् खानस्य आस्थाने सङ्गीतशास्त्रप्रवीणः पुण्डरीको नाम कविः अपि च अन्ये केचन कवयश्चासन्निति साहित्येतिहासकाराः सूचयन्ति। शेर् शाहः निजाम् शाहः

---

[1] काश्मीरागन्तुकामस्य मीरशाहस्य भूपतेः।
भाहबुद्दीनभूमीन्द्रः प्राहिणोदिति लेखकम्।। पुल्लेल श्रारामचन्द्रव्यासमञ्जरी पुटसंख्या 555

(1540-1545) इत्यादीनाम् आश्रये भानुकरो नाम महान् कविपण्डितः आसीत्। अयं नैकानि काव्यान्यरीरचदिति ज्ञायते[2]।

अक्बर् चक्रवर्तिनः राज्ये अनेके कवयः आसन्। तस्मिन् काले सुप्रसिध्दः कविः वाफकेल रामचन्द्रः अक्बर् राज्ञः सकाशात् अक्बरीयकालिदासः इति बिरुदं प्राप्नोत्। हीरविजयसूरिः, विजयसेनसूरिः, भानुचन्द्र उपाध्यायः, शान्तिचन्द्र उपाध्यायः इत्यादयः महान्तः विबुधाः अक्बरस्य आस्थाने आसन्। भानुचन्द्र उपाध्यायः प्रतिदिवसं प्रातः अक्बर् चक्रवर्तिनम्प्रति **सूर्यसहस्रनामस्तोत्रं** श्रावयति स्मेति इतिहासकाराः ब्रुवन्ति।

शाजहानस्य सभायामपि नैके कवयः, विविधकलासु निष्णाताः विद्वांसश्चासन्। तेष्वग्रगण्यः जगन्नाथ पण्डितराजः। **गङ्गालहरीत्यादि** सुमधुरकाव्यानि, रसगङ्गाधरम् इत्यादि शास्त्रग्रन्थप्रणेता जगन्नाथः दिल्लीश्वरं शाजहानं कीर्तयन् **जगदाभरणं** नाम काव्यं व्यरचयत्[3]। शाजहानस्य मित्रं असफखानं स्तुवन् **असफविलासम्** इत्याख्याम् आख्यायिकामपि रचयामास। कविकर्णपूरो नाम कविः शाजहानस्य पितुः जहंगीरस्यादेशेन **संस्कृत-पारसीकपदकोशः** इति द्विभाषानिघण्टुं विनिर्ममे[4]। निघण्टौ अस्मिन् श्लोकाः एवं वर्तन्ते-

यक् संबे रविवारे स्यात् दुसंबे सोमवासरे।
सेसंबे मंगलदिने चहार् संबे बुधे भवेत्।।

---

2 श्लोकार्धे वा तदर्धे यदि विनिहितं दूषणं दुर्दुरूढैः-------- का हानिः शेरसाहक्षितिपकुलमणेः अश्वकोटीश्वरस्य।। (तत्रैव)

3 ढिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः।
अन्यैर्नृपालैः परिदीयमानं शाकाय वा स्याल्लवणाय वा स्यात्।। इत्यादि प्रसिध्दाः श्लोकाः जगन्नाथपण्डितस्यानुरञ्जयन्ति सहृदयान्।

4 कर्णपूरः कामरूपवासी करणवंशजः।
कारिकां कुरुते भाषासारसङ्ग्रहकारिकाम्।।
श्रीमज्जहंगीरमहीमहेन्द्रप्रसादमासाद्य निदेशरूपम्।
करोत्यदः संस्कृतपारसीकपदप्रकाशं कविकर्णपूरः।।(पुल्लेल श्रीरामचन्द्रव्यासमञ्जरी पुटसंख्या 557)

पंचसंबे गुरौ जुम्मा शुक्रे जोहाल् शनैश्चरे।
व्रतमासे तु रम्जानं सौवारस्तदनन्तरम्[5]।।

महम्मदीयराजसु प्रसिध्दस्य औरंगजेबस्य मातुलः आसीत् शायिस्ताखान् इत्याख्यः।तेन सम्मानितः चतुर्भुजो नाम कविपण्डितः तं प्रशंसन् **रसकल्पद्रुमम्** इति साहित्यशास्त्रग्रन्थं अरीरचत्। अपि च लक्ष्मीपतिर्नाम कविः महम्मद् शा इत्यस्य सचिवं प्रीणयितुं **अब्दुल्ला चरितम्** अरचयत्। मुघल् साम्राज्यस्य इतिहासमस्मिन् काव्ये सः बहुधा अवर्णयत्।

बीजापूरराजा इब्रहीम् अदिल् शाहः अनेकान् कवीन् शास्त्रपण्डितान् पोषयामास। तेषु प्रसिध्दः नरसिंहपण्डितः **नवरसमञ्जरी** इत्याख्यं साहित्य शास्त्रग्रन्थम् प्रणिनाय। एवमेव बडे साहब् इति नामान्तरेण ख्यातिं गतः अक्बर् शाहः **श्रृङ्गारमञ्जरीम्** अलेखीत्।

एवं न केवलं काव्यानां रचनाय प्रोत्साहितवन्तः महम्मदीयराजानः किन्तु संस्कृतग्रन्थान् पारसीकादि भाषाभिरनूदितुमपि कवीन् पण्डितान् बहुधा प्रोत्साहयन्तः संस्कृतभाषायाः वाङ्मयस्य च सेवाम् अकार्षुः।

त्रयोदशे चतुर्दशे च शतके वंगदेशस्य पालकः नाजीर् शाहः **श्रीमद्वाल्मीकिरामायणम्, महाभारतं** च बेंगाली भाषया अनुवादम् अकारयन्। अन्यो राजा हुस्सेन् शाहः **श्रीमद्भागवतमहापुराणस्य** बेंगालीभाषानुवादं कारयामास। मोगल् साम्राज्याधिपतिः बाबरः खगोलशास्त्रस्य विषये अनुरक्तिं प्रदर्शयति स्म। अपि च फैजा इत्याख्यः पण्डितः **लीलावती गणितशास्त्रम्,** मुकुर्मुल् खानः ताजक् इति गुजराती भाषया उपनिबध्दं **खगोलशास्त्रग्रन्थं,** नश्रुल्ला मुश्तफा कविः **हरिवंशम्,** मौला हुशैनी पैजः **पञ्चतन्त्रम्** पारसी भाषया अनूद्य संस्कृतस्य महत्त्वं परिव्यापयितुं बहुधा प्रायतन्त। जहंगीरराजस्य पुत्रः दाराशिकोहः उपनिषदः अनूद्य पारसीभाषया **सर् उल् अक्बर्** इति नाम्ना

---

5 तत्रैव 558

प्राकाशयत्। हिन्दू-इस्लां सम्प्रदाययोः द्वयोः तुलनां कुर्वन् संस्कृतेन **समुद्रसङ्गमम्** इति ग्रन्थं व्यरचयत्।

अक्बरस्य एवं च जहंगीरस्य च समकालिकः **नवाब् अब्दुल् रहीम् खान खाना** इत्याख्यः महान् कविः संस्कृते पारसीकभाषायां च निपुणः लब्धप्रतिष्ठश्च आसीत्। अयं नैकानि शास्त्राण्यध्यगच्छत्। अनेन चोदितः श्रीकृष्णदेवज्ञो नाम विद्वान् जातकपध्दत्युध्दरणम् इत्याख्यं ज्योतिषग्रन्थम् अरचयत्। अपि च रुद्रकविः खानखानचरितम् इति काव्यं विरचय्य तस्मिन् खानखानस्य वैदुष्यम् औदार्यञ्चाभ्यवर्णयत्।

नवाब् अब्दुल् रहीम् खान् खाना पण्डितस्य जीवनम्, कृतयः-

संस्कृत परिषद् पक्षतः एतावत्पर्यन्तं नैकानि श्रव्यकाव्यानि रूपकाणि प्रकाशितानि। तत्र प्राचीनानि आधुनिकानि च वर्तन्ते। तानि सर्वाण्यपि प्रायः भारतीयैः साम्प्रदायिकैः विद्वत्कविभिः रचितान्येव। इदानीं महम्मदीयवंशजातस्य **नवाब् अब्दुल् रहीम् खान् खाना** इत्याख्यस्य कवेः संस्कृतलघुकाव्यानि प्रकाश्यन्ते। अयं नवाब् **नवाब् अब्दुल् रहीम् खान् खाना** महाशयः1557 तमे वर्षे लाहोर् नगरे स्वजनिम् अलभत। अस्य मातापितरौ सुल्ताना बेगम्, बाईराम् खान् खानौ[6] आस्ताम्। **अब्दुल् रहीम् खान् खानः** अरबिक् पर्शियन्, टर्की, हिन्दी, संस्कृतम् इत्यादि भाषासु पटुत्वम् अगात्। युध्दशास्त्रे कशली अयं अक्बरस्य सैन्याध्यक्षपदम् अलञ्चकार। अपि च जहंगीरस्य शाह जहान् चक्रवर्तिनः राज्ये उन्नतं पदम् अवाप्नोत्। अत एव सः ऐश्वर्यवत्सु अग्रगण्यः आसीत्। **परोपकाराय सतां विभूतयः** इत्युक्तवत् अयं दानशीलः आसीत्। भारतीयसम्प्रदायानुरक्तोऽयं विद्वान् संस्कृत-हिन्दी ग्रन्थान् प्रसिध्दान् अध्यगीष्ट। तत्कालीनानां हिन्दीकवीनां प्रशंसां प्रापत्। अपि च

---

6 अयं बाईराम खानः मुघल् साम्राज्यस्य सेनाधिपतिः आसीत्। अक्बर् चक्रवर्तिनः कृते अयम् मुख्यपरामर्शदाता, मार्गदर्शकः, उपदेशकः, गुरुः, संरक्षकश्च आसीत्। अत एव एनम् खान्-ए-खान् (राज्ञां राजा इत्यर्थः) इति बिरुदेन सत्कृतवान्।स्वषोडशे वर्षे एव मुघल् राज्ये प्राविशत्। तत्र हुमायुन्, बाबर्, अक्बर् इत्यादीनां महम्मदीयपालकानां सर्वेषां सम्मानम् अवाप्नोत्। (https://en.wikipedia.org/wiki/Bairam_Khan)

अक्बरस्य आस्थाने स्थितोऽयं धीरः कवीन् पण्डितांश्च बहुधा सम्मानयामास। अस्य राजनीतिज्ञतां, धर्मसहिष्णुतां, लोकोत्तर काव्यप्रतिभां, विविधभाषा पाण्डित्यम्, समाजम्प्रति स्थिताम् अस्य आदरतां दृष्ट्वा विस्मिताश्च संस्कृत-हिन्दी-पर्शियन्-अरबिक् इत्यादि भाषासु नैके कवयः काव्यानि लिलिखुः[7]। तत्रास्य वैशिष्ट्यम् उपवर्णयन् षोडशशताब्दीयः रुद्रकविर्नाम कश्चन महाकविः **नवाब् खानखानाचरितम्** इति चम्पूकाव्यम् चतुर्षु उल्लासेष्वरचयत्[8]। अयं रुद्रकविः **राष्ट्रौढवंशमहाकाव्यम्, जहंगीरचरितम्, दानशाहचरितम्, कीर्तिसमुल्लासः** इत्यादि काव्यान्यरीरचदिति साहित्येतिहासग्रन्थेषु दृश्यते।

महाकविः केशवदासः, हरिनाथः, तारा कविः, लक्ष्मीनारायण मैथिलः, महाकविः बिहारीलालः इत्यादयः पञ्चदशाधिकाः प्रसिध्दाः हिन्दीकवयः अब्दुल् रहीम् खान् खानस्य महत्त्वं मानवीयतां च वर्णयन्तः काव्यानि निबबन्धुः हिन्दीभाषया।पर्शियन् भाषया अपि बहवः कवयः एतस्योत्कृष्टताम् उपावर्णयन्। एतेषु सर्वेषु अब्दुल् बाकी महानन्दी इत्यख्यः विबुधः खान् खाना पण्डितस्य चरितम् उपवर्णयन् 2500 पुटात्मकं **महासिर् ए रहीमी** इति नाम्ना बृहदितिहासग्रन्थमेवारचयत् ।

एतादृशः अब्दुल् रहीम् खान खाना महाशयः अरबी, तुर्की, फारसी, हिन्दी, संस्कृतं इत्यादिषु बह्वीषु भाषासु आधिपत्यं सम्प्राप्य, ग्रन्थाननेकान् अधिगत्य, तासु सर्वास्वपि भाषासु काव्यान्यलेखीत्। एकस्याः भाषायाः

---

7 मन्ये विश्वकृता दिशामधिपता त्वय्येव संस्थापिता
यस्माज्जिष्णुरसि प्रभो शुचिरसि त्वं धर्मराजोप्यसि ।
राजन् पुण्यजनोसि विश्वजनताधारप्रचेता जगत्
प्राणास्त्वं धनदो महेश्वर इह श्रीखानखानप्रभो ।। (नवाब् खानखानाचरितम् IV-6)

8 काव्यमिदं प्रताप कुमार मिश्र महोदयेन हिन्दी अनुवादेन सह प्रकाशितम् । अपि च अखिलभारतीयमुस्लिम् संस्कृति-संरक्षण एवं प्राच्यशोधसंस्थान् वाराणसी इति संस्थातः 2007 तमे वर्षे मुद्रितः । अस्य पाण्डुलिपिप्रतिः नागपुरविद्यापीठे एवं च Common Wealth Relations office Library, London, Mss. No. 7304, Buhler 70 B इत्यत्रापि वर्तते इति काव्यस्य पीठिकायां प्रताप कुमार मिश्र महोदयेन स्पष्टीकृतम् । (नवाब् खानखानाचरितम् पुटसंख्या-5)

काव्यानि अन्यासु भाषास्वनूदितवान्। इदानीं वयं संस्कृत अकाडम्याः पक्षतः तस्य पञ्च लघुकाव्यानि **खेटकौतुकम्, त्रयस्त्रिंशद्योगावली, गङ्गाष्टकम्, रहीम् काव्यम्, मदनाष्टकम्** पुनर्मुद्रणयोजनायां प्रकाशयामः।

खेटकौतुकम् – ज्योतिष शास्त्रसम्बध्दी ग्रन्थोऽयम्। अत्र संस्कृत-पर्शियन् भाषाद्वयमिश्रितश्लोकाः दृश्यन्ते। मानवे ग्रहाणाम् प्राभवम् अवर्णयत् खान् खाना महाशयः124 श्लोकेषु। अस्मिन् स्रग्विणी, भुजङ्गप्रयातम्, प्रमाणिका (अनुष्षुप्) समानिका (अनुष्टुप्) मालिनी, उपजाति, स्वागता, आर्या, अनुष्टुप् इत्यादि वृत्तैः श्लोकान् रचयामास सः। अनेनावगन्तुं शक्यते यत् रहीम् खान् खाना महाशयः संस्कृतच्छन्दःशास्त्रमपि सम्यगधीतवानिति। भाषाद्वये स्वपटुताम् अवगमयितुं सः कुत्रचित् भाषाद्वयमिश्रितरचनाम् अकरोत्। अतो हेतोः एतदवगन्तुं भाषाद्वयज्ञानमावश्यकं भवति पठितॄणां कृते। खेटकौतुकमेतत् लक्ष्मीवेङ्कटेश्वरमुद्रणालयात् मुम्बईतः 1908 वर्षे मुद्रितम् , अपि च डा जितेन्द्र बिमल् चौधरी महाशयः कलिकतायाः प्राच्यवाणी पत्रिकायां 1954 तमे मुद्रापितवान्[9]।

त्रयस्त्रिंशद्योगावली – अयमपि ज्योतिषशास्त्रसम्बध्दग्रन्थ एव। भुजङ्गप्रयातम्, इन्द्रवज्रा, उपजाति, वसन्ततिलका, मालिनी इत्यादिभिः छन्दोभिः त्रयस्त्रिंशत् श्लोकेषु रचितवान् खान खाना कविः काव्यमिमम्। उज्जयिनीस्थ विक्रमविश्वविद्यालयस्य सिंधिया ओरियंटल् रिसर्च् ग्रन्थालये अस्य हस्तलिखितप्रतिद्वयं वर्तते। तत्रस्थे प्रतिद्वयेऽपि पञ्चत्रिंशत् श्लोकाः दृश्यन्ते किन्तु पुस्तकस्यान्ते इति **त्रयसत्रिंशद्योगावलि मूलमात्रं समाप्तम्। समाप्तोऽयं ग्रन्थः। सिध्दनाथ 24-22-32, प्रधानाध्यापक श्री जिवाजी राव् संस्कृत पाठशाला, ठी. सुखोडा, जि. मन्दसौर्, स्टेट् ग्वालियर्**

---

9 मुसल्मान् कवीनां संस्कृतसेवा इति शीर्षिकया चौधरी महाशयः नैकेषां मुसल्मान् कवीनां परिचयं चकार तत्र ।अत्र वयं प्राच्यवाणी पत्रिकायां प्रकाशितं
खेटकौतुकम् आश्रित्यैव अस्मिन् लघुकाव्यसङ्ग्रहे मुद्रापयामः।

इत्युल्लिखितम्। प्रोफेसर् राधावल्लभ त्रिपाठी महाशयः स्वलिखिते **संस्कृत साहित्य को इस्लाम् परम्परा का योगदान्** इत्याख्ये ग्रन्थे प्रकाशितवान्।

गङ्गाष्टकम् – संस्कृतस्तोत्रपरम्परायां पुराणकालादारभ्य अष्टकम् इति नाम्ना शतशः स्तोत्राणि अवलोक्यन्ते। परम्परया तया चोदितः खान् खाना कविः भगवतीं गङ्गानदीं **जगत्त्रिदोषतस्तनुं पुनातु जह्नुनन्दिनी** इति स्तुवन् गङ्गाष्टकं पञ्चचामरवृत्तेन रचयामास[10]। कवेः भाषा अत्र सुमधुरा। नरेन्द्रपुत्रमुक्तिदा, शिवोत्तमाङ्गवेदिका, मुनीन्द्रवृन्दवन्दिता, अच्युतचरण तरङ्गिणी इत्यादिभिः सुमनोहरैः विशेषणैः परमपावनीं गङ्गाम् अस्तवीत्।

रहीम् काव्यम् – अस्मिन् काव्ये अष्टौ श्लोकाः विद्यन्ते। मुक्तकं काव्यमेतत्। संस्कृतहिन्दीभाषयोः सम्मिश्रणेन मुक्तककाव्यमिदम् अरचयत् रहीम् खान् खाना महाशयः। इन्द्रवज्रा, वसन्ततिलका, शिखरिणी, आर्या, शार्दूलविक्रीडितम् इत्यादिषु वृत्तेषु श्लोकान् निबबन्ध कविरत्र।

एकस्मिन् दिवसानसमये, मैं था गया बाग् मे
काचित्तत्र कुरङ्गवालनयना, गुल् तोडची थी खडी।
तां दृष्ट्वा नवयौवनां शशिमुखीं मै मोह में जा पडा
नो जीवामि विना त्वया शृणु प्रिये तू यार कैसे मिले[11]।। इत्यादि

भाषाद्वयमिश्रिताः श्लोकाः सहृदयान् आनन्दयन्ति। काव्यमेतत् राजरत्नदास पण्डितः संशोध्य रामनारायण लाल् प्रेस् अलहाबाद् नगरात् 1987 वर्षे मुद्रापितवान्।

मदनाष्टकम् – अब्दुल् रहीम् खान् खाना कविः मुक्तककाव्यम् एनमपि संस्कृत-हिन्दी भाषयोः मिश्रणेन रचितवान्। अष्टकेऽस्मिन् मालिनी छन्दसा श्लोकान् उपनिबध्दवान्। काव्यमेतत् हिन्दी साहित्यसम्मेलनस्य

---

10 अलहाबाद् नगरात् प्रकाशित सङ्गमनी इत्याख्यायां पत्रिकायां गङ्गाष्टकम् मुद्रितम्। आचार्य राधावल्लभ त्रिपाठी महाशयोपि स्वग्रन्थे मुद्रापयामास।

11 रहीम काव्ये श्लोकः -7

सम्मेलन् पत्रिकायाम् 1979 तमे वर्षे प्रथमं मुद्रितम्। अन्या अपि प्रतिरुपलभ्यत इति परिशीलकाः वदन्ति।

एवम् नवाब् अब्दुल् रहीम् खान् खाना महाशयः न केवलं कविः, अपि तु पण्डितः, योध्दा, राजनीतिज्ञः, परिपालनादक्षः, कविपण्डितपोषकः, समाजसेवकः। यद्यप्यस्य संस्कृतलघुकाव्यानीतःपूर्वं कुत्रचित् प्रकाशितानि तथापि काव्यानि सर्वाणि सम्यक् संशोध्य एकत्रीकृत्य प्रकाशयामश्चेत् संशोधकानां कृते उपयोगाय भवतीति अकाडम्याः सारस्वतसमितौ विचिन्त्य इदानीं शोधकर्तॄणां पुरस्तात् आनयामः।

अब्दुल् रहीम् खान् खाना महाशयस्य काव्यानां वैशिष्ट्यं मां प्रास्तौत् अस्माकं सुहृत् डा. अब्दुल् ग़नी महाशयः। अयम् इदानीं Deputation रूपेण तेलङ्गाणा सर्वकारीयप्राचीनलिखितपुस्तकभाण्डागारे कार्यं कुर्वन्नस्ति। अयं मित्रवरः खान् खाना कवेः काव्यानि सङ्गृह्य संशोधयित्वा अस्मभ्यं समार्पयत्। अपि च अध्येतॄणां सौलभ्याय अन्त्ये संस्कृतेतरपदानां सूचीमपि अर्थेन सह पूर्वग्रन्थेभ्यः सङ्कलनं कृत्वा अस्मिन् उपस्थापयितुं प्रायतत। एवं जागरूकतया लघुकाव्यसङ्ग्रहम् एकत्रीकृत्य अस्मभ्यं दत्तवते डा अब्दुल् घनि महाशयाय धन्यवादान् वितरामि।

अस्माकं संस्कृत अकाडम्याः उपनिदेशकौ निरन्तरं अध्ययनाध्यापनरतौ संशोधनपटू डा वि सुब्रह्मण्यः, डा के. वरलक्ष्मीः, शोधसहायकौ अनुसन्धानरतौ विपश्चितौ श्री के वि सूर्यप्रकाशः डा जोशी सन्तोषकुमारः, एतेषां चतुर्णां कार्यदीक्षाबलेन पुस्तकप्रकाशनं सुकरं भवत्यकाडम्याः। एतेभ्यः शुभाभिनन्दनानि। युवसंशोधकः चिरजीवी जोशी भरद्वाजः अस्य प्रकाशने माम् अत्यन्तम् उपकरोत् । तस्मै शुभाभिनन्दनानि वितरामि।

ग्रन्थानां संशोधने मुद्रणे चास्मान् सततं प्रोत्साहयन्ति नवदेहलीस्थ केन्द्रीय संस्कृत विश्वविद्यालयस्य (राष्ट्रीय संस्कृत संस्थानस्य) आदरणीयाः

उपकुलपतिवर्याः आचार्याः श्रीनिवास वर्खेडि महोदयाः, कुलसचिवाः आचार्याः गायत्री मुरलीकृष्ण महाशयाः, तेभ्यः सश्रध्दं प्रणामाञ्जलिं निवेदयामि। अपि च उस्मानिया विश्वविद्यालयस्य उपकुलपतिवर्याः माननीयाः आचार्याः डि रवीन्दर् महाशयाः, कुलसचिवाः आचार्याः पि. लक्ष्मीनारायण महाशयाः परिशोधने पुस्तकप्रकाशने च सततम् अस्मान् प्रचोदयन्ति। एवमेव केन्द्रीय संस्कृतविश्वविद्यालये आदर्शसंस्थानां निदेशकः आचार्यः मधुकेश्वर् भट्ट महाशयः सस्नेहं सर्वथा अस्मान् प्रेरयति। एतेभ्यः सुहृद्भ्यः सर्वेभ्यः धन्यवादान् वितरामि।

उचितरीत्या समये मुद्रणं कृत्वा दत्तवद्भ्यः Karshak Art Printers महाशयेभ्यः संस्कृत अकाडमी पक्षतः धन्यवादान् प्रकटयामि।

बुधजनविधेयः
आचार्यः के. नीलकण्ठः
निदेशकः संस्कृत अकाडमी, हैदराबाद

Preface

Abdul Rahim Khan-i-Khana is treated as the forerunner of Indian cultural co-ordination. He was one of the "*Navaratnas*" of Mughal emperor Akbar. Nawab Abdul Raheem khan-I khana was born in Lahore in (1613 samvat) 16th December 1556 A.D. his father was Bairam Khan and mother Sultana Begum daughter of Jamal Khan Mewati. Abdul Rahim was very intelligent, within a short period, learnt Arabic, Persian Turkey, Hindi and Sanskrit. With his ability he became chief commander of Akbar. He occupied highest posts in the courts of Jahangir and Shah Jahan too. Khan Khana at the age of seventy two years died in 1627 A.D. in Delhi.

Khan Khana was fabulously rich, no doubt, but at the same time he was very well known for his charity. He was very great patron of learning and like his master Akbar. His enthusiasm for learning Sanskrit and Hindi made him very close to all great Hindu poets of the age, like Tulasidasa, Suradasa, Matirama etc.

It is his literary pursuits and achievements that have made him immortal.

He was the patron of many Sanskrit and Hindi poets Gang, Keshava, Lakshmipati. They all have acknowledged sincere and heartfelt gratitude to him.

There is a work on the life of Nawab Khan Khana called *Nawab Khan Khana Charitam* by Rudra Kavi, which is dated to 1609 A.D. and was composed during the reign

of Jahangir. Unfortunately only one Manuscript of this very fascinating work is available. It is now preserved in the Common Wealth Relations Office Library, London, Manuscript No.7304, and Buhler 70B. The work was critically edited for the first time by Prof. Jatindra Bimal Choudhuri and published in 'Contribution of Muslims to Sanskrit learning' vol.II from Pracyavani, Culcutta in 1954.

Rudrakavi was a Poet of high order. He entertained a high opinion about Khan Khana; so this work has been a very welcome addition to our knowledge about a great poet who flourished during Muslim rule in India. Beside *Khan Khana Charitam* he composed *Danshahacharita,* in praise of Akbar's son Danyal in 1603. Further he authored *Jahangiracharita* for Jahangir and the *Kirtisamullasa* in honour of Prince Khurram, the future Shan Jahan.

The poet Rahim Khan Khana was a multi linguist. He had written many books in Hindi and Sanskrit. His Sanskrit books are "*Khetakoutukajatakam*", "*Trayastrimshadyogavali*", "*Gangashtak*", "*Madanashtak*", and "*Raheem-Kavya*". He is famous for his "moral base-couplets"(Dohe) in the Indian literary world. *Dohavali, Baravai Nayika Bhed, Nagar Shobha, Baravai, Shringara Sorath* and *Phutkar Pad* are notable works in Hindi.

He translated Babur's Autobiography "Babarnama" from Turkey into Persian with title "Waqeyat-Babri". He was well versed in Persian and wrote a *Deewan* in it.

There is a Tradition it that once Jagannatha Trisuli, a poet friend of Khan-i-Khana recited to him a couplet composed by him:

प्राप्य चलनाधिकारान् शत्रुषु मित्रेषु बंधुवर्गेषु ।
नापकृतम् नोपकृतम् नोपकृतम् किं कृतं तेन ।।

If by getting into office, which is impermanent, one did not harm the enemies or favour the friends, or honour the rlations, what has one done?

Khan-iKhana quietly listened to it, changed only the Matra in the first syllable in the second hemistich and recited it back:

नोपकृतम् नोपकृतम् नोपकृतम् किं कृतं तेन ।

What greatness! Even in the case of the enemies it should not be *apakrtam*, harm. It should be *upakrtam*, favour.

Khan-iKhana also introduced the style of himself rendering (i).some of his own verses and (ii) those of earlier authors in Braj.

An instance of (i) is:

Sanskrit original:

अच्युतचरणतरङ्गिणी शशिशेखरमौलिमालतीमाले ।
मम तनुवितरणसमये हरता देया न मे हरिता ।।

Braj rendering:

अच्युतचरणतरङ्गिणी शिवसिर मालतीमाला ।
हरि न बनायो सुरसरी कीजो इंदव भाला ।।

An ianstance of (ii) is:
Sanskrit original:

याचनाहि पुरुषस्य महत्त्वम् नश्यते अखिलम् एव तथा हि ।
सद्य एव भगवान् अपि विष्णुर् वामनो भवति याचितुम् इच्छन् ॥

Supplication takes away from a person his entire dignity. Intending to beg even the Lord turns dwarf in an instant.

Braj rendering:

रहिमन याचकता गहे बड़े छोटे ह्वै जात ।
नारायण हूको भयो बावन अंगोरा गात ॥

O Rahim, taking to begging even a big man turns small. Even Narayana (visnu) came to have a body measuring fifty-two fingers.

Kheta-Kautuka:

This is an astrological work composed in the mixed language of Sanskrit and Persian. Kheta means 'Graha' or planet, and their Kautuka or influence upon human being in fashioning their destiny is the subject -matter of the work.

Kheta kautuka was first time published from Lakshmi Venkateshvara Press, Bombay in 1908 A.D. There were many errors in that printed book but the eminent Sanskrit scholar Dr.Jatindra Bimal Choudhuri edited this book and published it from Pracyavani, Culcutta in 1954 under the part of 'Contribution of Muslims to Sanskrit learning,' vol-II. I took kheta kautuka text from this edition.

The Kheta-Kautuka contains in 99 verses the Bhava-Phalas of the twelve Rashis. Again, allowances must be

made for varying results in accordance with the strengthening or weakening outlook of the planets. It is only natural that their influence under all circumstances cannot be just the same.

Besides, in the last 25 verses, 25 Raja-yogas, or lucky combinations of planets have been dealt with. They point out the particular planetary situations which are bound to bring about good luck in due course. They may even forecast Kingship under extremely favourable planetary combinations.

In a pure Sanskrit verse in the beginning of his *Khetakautuka* he says that he is following the footsteps of earlier writers who composed their works with an admixture of Persian vocabulary.

फारसीयपदमिश्रितग्रन्थाः खलु पण्डितैः कृताः पूर्वैः ।
सम्प्राप्य तत्पदपथं करवाणि खेटकौतुकं पद्यैः ॥

The contents of the kheta-kautuka are described as follows:

Verse 1 : worship of Istamurti (Favourite deity)

Verse 2 : Introductory verse

Vs. 3-14 : Human destiny as ordained under the influence of the Sun upon different Bhavas.

Vs. 15-26 : Human destiny as ordained under the influence of the Moon upon different Bhavas.

Vs. 27-38 : Human destiny as ordained under the influence of the Mars upon different Bhavas

Vs.39-50: Human destiny as ordained under the influence of the Mercury upon different Bhavas.

Vs. 51-62 : Human destiny as ordained under the influence of The Jupiter.

Vs. 63-74 : Human destiny as ordained under the influence of the Venus.

Vs. 75-86 : Human destiny as ordainedunder the influence of Saturn.

Vs. 87-98 : Human destiny as ordained under the influence of the Rahu.

Verse 99 : Human destiny as ordained under the influence of Ketu.

Verse 1-25 : Raja-yogadhyaya.

A verse from *khetakautuka* where he employs the mixed style would suffice to give one an idea of it.

From the khetakautuka :

दानीश्वरो मनुष्यः सुतधनधान्यैश्च सङ्कुलो यस्य ।
जोहरा पञ्चमखाने भवति यदा हि महीपतेः प्रीतिः ॥67॥

"If Venus be in the fifth zodiac sign, one acquires fame as a donor, possesses vast wealth and gives birth to many sons, and becomes a favorite of the ruler."

This work shows his mastery in Sanskrit language because he uses Arabic and Persian words by using Sanskrit prefixes. See the example–

हज्रते च खुशपीरजवांश्च खूबरो बहुसुखी च मुशीरः ।
आमिलश्च यदि यख्तमखाने मुश्तरी प्रविभवेत् खलु यस्य ॥59॥

Trayastrimshadyogavali :

This is an astrological work of Rahim. Two manuscripts of this work are preserved in the archives of the Scindia Oriental Research Library run by Vikram University Ujjain, with serial number 2541 and 2543. In these copies 35 verses available. its colophon mentioned.

इति त्रयस्त्रिंशदयोगावलि मूलमात्र समाप्त। समाप्तोऽयं ग्रन्थः सिद्धनाथ २४-२२-३२ प्रधानाध्यापक श्री जिवाजीराव् संस्कृत पाठशाला, ठी. सुखोडा, जि. मन्दसौर, स्टेट् ग्वालियर्।

This text first time included in Prof Radhavallabh tripathi's 'Sanskrit Sahity Ko Islam Parampara Ka Yogdan'.

Gangashtaka:

This book of Raheem available in eight verses only. Content of this book is beauty and legecy of Ganga in an attractive style. New Catalogues part 5, page 183 mentioned about this work "Gangashtaka' in Sanskrit printed on the basis of a manuscript in Bharatpur in the Sanskrit magazine Sangamani Alahabad II, pp.89-91." See the example from this book-

सरस्वती-प्रपूरसूर-कम्यकाम्बु-सङ्गिनी
मुनीन्द्रवृन्दवन्दिता त्रिवेणिका तरङ्गिणी।
मुमुक्षुसङ्गसेविता सुतीर्थबुद्धिवन्दिनी
जगत्त्रिदोषतस्तनुं पुनातु जह्नुनन्दिनी॥

Its comlete text available inProf. Radhavallbh Tripathi's edited book 'Sanskrit Sahity ko Islam parampra ka yogdan'. Further it was published in 'Khan Khana Abdur Rahim aur Sanskrit' by Pratap Kumar Mishra.

Rahim-Kavya :

This work contains verses composed in a mixed language Hindi and Sanskrit. The verses more or less unconnected with one another. This exhibits a beautiful linguistic combination that is representative of the peaceful social life of Hindus and Muslims alike of his period.

एकस्मिन् दिवसावसानसमये, में था गया बाग़ मे
काचित्तत्र कुरङ्गबालनयना, गुल् तोड़ती थी खडी ।
तां दृष्ट्वा नवयौवनां शशिमुखीं, मैं मोह में जा पड़ा
नो जीवामि विना त्वया श्रुणु प्रिये, तू यार कैसे मिले ॥

"One evening I went to a garden when a damsel with eyes like those of the young one of a deer was picking up flowers. When I spotted that young lady with a moonlike face I lost my consciousness. O my darling, listen, I can't live without you. How can I, o loved one, meet you?"

Khan-i-Khana has not invariably followed the mixed style, he has written in pure Sanskrit also. A few of his Sanskrit verses are marked with intense spirituality, e.g.

अहल्या पाषाणः प्रकृतिपशुरासीत् कपिचमू-
गु होऽभूच्चाण्डालस्त्रितयमपि नीतं निजपदम् ।
अहं चित्तेनाश्मा, पशुरपि तवार्चादिकरणे,
क्रियाभिश्चाण्डालो, रघुवर न मामुद्धरसि किम् ॥

"Ahalya was a stone. The army of monkeys was animal by nature. Guha was candala. All of those three were taken by you to your abode. I am a stone in mind, an animal in offering you worship etc., and candala in actions. O Rama why don't you then come to my rescue?"

In the same strain is another verse of his that has gained wide currency in Sanskrit circles because of bringing out the absolute devotee in him to the point of total absorption of his thoughts in his Lord. In this he offers his own mind to the Lord, He being without it in Radha having taken it away:

रत्नाकरोऽस्ति सदनं गृहिणी च पद्मा
किं देयमस्ति भवते जगदीश्वराय ।
राधागृहीतमनसेऽमनसे च तुभ्यं
दत्तं मया निजमनस्तदिदं गृहाण ।।

"The ocean, the repository of jewels, is the abode. Padma (Lakshmi, the Goddess of Fortune) is the wife. What is that which can be offered to thee, the Lord of the Universe? To thee who have lost His mind in Radha having carried it away I offer my own mind. Pray thou accept it".

Text of Rahim kavya taken from Rahiman Vilas edited by B. Rajratnadas and published from Ramnarayan lal, Allahabad,1987.

Madanashtaka :

This work is also composed in mixed Sanskrit and Hindi in the Sanskrit metre Malini. First time it was published in Hindi Sahitya Sammelan's journal sammelan Patrika of Bhadrapad samvat 1979 issue. One version available from Moazzamabad also. Pratap Kumar Mishra has included its all versions but I have taken only those verses which have half Sanskrit sentences. See the example—

शरद निशि निशीथे चाँद की रोशनाई
सघन वन निकुंजे कान्ह वंशी बजाई ।
रति, पति, सुत, निद्रा, साइयां छोड़ भागी
मदन शिरसि भूयः क्या बला आन लागी ॥

Any way the works of Rahim are unique in subject and reflect the beauty of Indian culture and knowledge system. It is a good example of cultural and linguistic coordination; such books are the need of present society I hope Sanskrit world may receive this work warmly and do furthur research. Keeping the importance of these five short poems (लघु काव्य's) of Abdul Raheem Khan-i-Khana. I approached Sanskrit Academy, Osmania University for publication.

I thank all those authors whose books have been referred to and cited.

I am gratefully indebted to Prof. K. Neelakantham, Director, Sanskrit Academy, Osmania University, Hyderabad for accepting to publish the book, He is a man of great inspiration and encouragement in the field of research. I am also thankful to all those academic and technical staff of the Sanskrit Academy who are the instrumental for the publication.

Dr. Shaik Abdul Ghani
Research Assistant (Sanskrit)
Telangana Govt. Oriental Manuscripts
Library and Research Institute,
Osmania University Campus,
Hyderabad-7

Hyderabad.
16th December, 2023.

विषयसूची

1

खेटकौतुकम्

(नवाब खानखाना अब्दुर्रहीम विरचितम्)

यत्पदपङ्कजरेणोः प्रसादमासाद्य सर्वभुवनेषु ।
प्रणमामीष्टसुमूर्ति तामहममराः प्रभुत्वमपि यान्ति ।।1।।

फारसीयपदमिश्रितग्रन्थाः खलु पण्डितैः कृताः पूर्वैः ।
सम्प्राप्य तत्पदपथं करवाणि खेटकौतुकं पद्यैः ।।2।।

अथ लग्नस्थसूर्यफलम्

लग्नगः सम्शखेटस्तदा लागरः कामिनीदूषितो दुष्प्रजो वै यदा ।
पण्यरामारतो राशिमीजान्गतो मानहीनोऽथ हीर्ष्यी विद्दष्टिः पुमान् ।।3।।

द्वितीयभावस्थसूर्यफलम्

यदा चश्मखाने भवेदाफताबस्तदा ज्ञानहीनोऽथ गुस्मर्वमुद्दाम् ।
सदा तङ्गदिल्शख्तगो द्रव्यहीनः कुवेषो गदी स्याद् बेहोशो दिवात्ताम् ।।4।।

तृतीयभावस्थसूर्यफलम्

यदा सम्शखेटस्तृतीयस्थितो नेककर्दानिरोगो हि शीरींसखुन् ।
सदा मोदते रम्यसीमन्तिनीभिः सवारो धनाढ्यो हि निःकोपशन् ।।5।।

चतुर्थभावस्थसूर्यफलम्

यदा मादरागारगः सम्शखेटः सुखी नोहि शंसः परेशानकः स्यात् ।
सदा म्लानचित्तोऽथ वेश्यारतो वा तथा जायते बेखुशी हिर्जगर्दः ॥6॥

पञ्चमभावस्थसूर्यफलम्

अक़्लखाने यदा सम्शखेटस्तदा मानवो मानहीनः सदा जाहिलः ।
स्वल्पसङ्गप्रजश्चौर्यचिन्ताधियुग् गुस्स्वरो धर्मकार्ये सदा काहिलः ॥7॥

षष्ठभावस्थसूर्यफलम्

यदा मर्जखाने भवेदाफताबो जलीलो गनी सूबरोहं अवाचः ।
सदा मातृपक्षोद्धृ तस्यायलब्धिनिरोगो नरः शत्रुमर्दी तदा स्यात् ॥8॥

सप्तमभावस्थसूर्यफलम्

यदा सम्शखेटः भवेन्मौतखाने मुखाफिर्विशे क्षुत्तृषापीडितो हि ।
सदा क्षीयते कामिनीभिर्महावञ्चको युद्धभूमौ चलोजम्बर ॥9॥

अष्टमभावस्थसूर्यफलम्

यदा सम्शखेटो भवेन्मौतखाने मुशाफिर्विशे क्षुत्तृषापीडितो हि ।
सदोद्योगहीनो महालागरः स्वीयदेशं विहायान्यदेशाटनः स्यात् ॥10॥

नवमभावगतसूर्यफलम्

रवौ वेषखाने प्रसिद्धः सुखी मानवश्चान्यवित्तैरलं शोभते ।
विघ्नवृन्दैर्युतो मातृपक्षात् सुखं नो धनाढ्यो यदा जायते वोच्चगः ॥11॥

दशमभावस्थसूर्यफलम्

रवौ शाहखाने धनाढ्यो वफारस्तदा मोदते वाजिवृन्दैः सुखी च ।
महीपान्तिकी नेककिर्दा सुशीलो जमीलें पितुः सौख्यमल्पं भवेद्वै ॥12॥

एकादशभावस्थसूर्यफलम्

यदा याफ्तिखाने भवेत्सम्शखेटः सुवेषो धनी वाहनाढ्योऽल्पशीलः ।
सुयोषः शुभौकाः सिपाही सलाही सविर्गीतगाने सुनेत्रोऽपि शिर्दार्॥13॥

द्वादशभावस्थसूर्यफलम्

यदा खर्चखाने भवेत् सम्शखेटस्तदा कम्ननिर्मानहीनो नरं स्यात् ।
अहल्खर्चकः सत्क्रियो वा शरारत्पनाहः सदा पीड्यतेऽङ्गेषु रोगैः ॥14॥

॥इति तन्वादिभावस्थसूर्यफलम् ॥

अथ लग्नस्थचन्द्रफलम्

जबर्कगार्यदाङ्ग गस्तवङ्गरः सुरूपवान् ।
सुधीः सुखी नरो भवेद्विलोमगश्च तन्न हि ॥15॥

द्वितीयभावस्थचन्द्रफलम्

कमर्यदा धनालयो धनी दमी प्रियंवदः ।
विदूषको नरो भवेद्बलान्वितो यकीं नरः ॥16॥

तृतीयभावस्थचन्द्रफलम्

कमविलाधशालये नरो हि वा मुरौवतः ।
सदा बली च साबिरः सुकर्मकृद्यदा भवेत् ॥17॥

चतुर्थभावस्थचन्द्रफलम्

कमर्यदाम्बुगेहगः सख़ी मुकर्रबः प्रभुः ।
भवेन्नरश्च मज्ञिसी वदा बुधः सुभाग्यवान् ॥18॥

पञ्चमभावस्थचन्द्रफलम्

कमर्यदिन्नगेहगः स गुल्फरू भवेन्नरः ।
बलान्वितो हि पादकी नदिल्पिशर्मकानगः ।।19।।

षष्ठभावस्थचन्द्रफलम्

काललो विपक्षपक्षपीडितो हि बद्शकल ।
लागरः कमर्भवेद्रिपौ यदा नरः सरुक् ।।20।।

सप्तमभावस्थचन्द्रफलम्

जन्मकामगः कमर्यदा भवेन्नरो भृशम् ।
गुल्फरू यशी ग़नी यशः कारोत्यहर्निशम् ।।21।।

अष्टमभावस्थचन्द्रफलम्

उमर्गृहि कमर्यदा नरो भवेत्सदाऽऽमयी ।
वहिर्जगुर्द गुस्सवर्व देशमुक् च निर्दयी ।।22।।

नवमभावगतचन्द्रफलम्

नशीबखानगः कमर्मु ईशसंज्ञकं नरम् ।
मुतम्मविल्च आमिलं सिकम्युकं करोति वै ।।23।।

दशमभावस्थचन्द्रफलम्

कमर्यदा गृहाश्रितो हि हम्जवारकं नरम् ।
तवङ्गरं च कामिलं करोति वै च साबिरम् ।।24।।

एकादशभावस्थचन्द्रफलम्

धनाधिपश्च खूबरू सखी सुबुद्धिपुङ्गरः ।
शिरींसखुन् विदूषको भवेद्यदा कमर्भवे ।।25।।

द्वादशभावस्थचन्द्रफलम्

व्यथालये कमर्यदा भवेत्किरीह चश्मखन् ।
विरोधनश्च खिश्मनाप्यकीर्तिमान हि उष्ट्रघः ।।26।।

।। इति चन्द्रफलम् ।।

अथ लग्नस्थमङ्गलफलम्

यदि भवति मिरीखो लग्नगः खिश्मनाक्स्या-
द्रुधिरप्रभवरोगैः पीडितो मुफ्लिसश्च ।
सकलजनविरोधी हासिलो लाग़रो ना
जनुषि खलु वियोगी दारपुत्रैर्हमेशः ।।27।।

द्वितीयभावस्थमङ्गलफलम्

यदि भवति मिरीखश्चश्मखाने बेहोशः
सुतधनसुखदारैर्वर्जितः शूरगः स्यात् ।
नसनयमुतफक्किर्हीनशक्तिर्बदर्दः
खलजन समबुद्धिर्मानवः कर्जदारः ।।28।।

तृतीयभावस्थमङ्गलफलम्

ज़रशुतुरजवाहिर्रव्रतम्बूकनातैः
सहजविमतिरोगैः संयुतोऽसंयुतश्च ।
यदि भवति मिरीखः खूबरो वा मुखैइल्
वजरफिवरसंज्ञः स्याद्विरादगृहे ना ।।29।।

चतुर्थभावस्थमङ्गलफलम्

पदकरजविराड्वै नो तनूत्थं सुखं च
समरधरधरायां धैर्ययुन्धी धनीनः ।
खरयुशनक बेदर्द कर्जमन्दो हमेशः
प्रभवति च मिरीखो दोस्तख़ाने नरश्चेत् ।।30।।

पञ्चमभावस्थमङ्गलफलम्

कमफहमतदाना अक़्लखाने मिरीखः
पिशरजर वजीरन्नेस्त दर्खानये स्यात् ।
अनिलकफजरोगैर्व्याकुलो बेमुरौवत्
गुसवर बद-अक़्लश्चोदरव्याधियुक् स्यात् ।।31।।

षष्ठभावस्थमङ्गलफलम्

रिपुजनपरिहन्ता खूबरो हम्जवान् स्या
ज्ञशनजरजलालैर्युङ् नहेवानजातः ।
यदि भवति मिरीखो मर्जखाने कदर्दान्
कृतकुलजननोखो मातृपक्षे कुठारः ।।32।।

सप्तमभावस्थमङ्गलफलम्

कमशहवत किर्यांवश्चवेरो नहि स्या-
ज्झिहिल जुलुमजङ्गैर्युङ्न चाऽल्पः खमाणे ।
तनुधनगमवेश्मस्त्री-सुखैर्वजितोऽज्ञो
भवति यदि जलादुल्कल्कको जन्मकाले ।।33।।

अष्टमभावस्थमङ्गलफलम्

यदि भवति जलादुल्फल्कको मौतखाने
सततमहितभाषी गुह्यरुक्स्त्रीसुखोनः ।
मुतफकिरबदामे जौहरी सोऽथ जख्मी
कमफहममनः स्याल्लागरोऽसृग्विकारैः ॥34॥

नवमभावस्थमङ्गलफलम्

नरपतिकुलमान्यः संलभो वन्दनादौ
भवति यदि जलादुल्फल्कको बख्तखाने ।
परयुवतिरतः स्यान्मानवो भाग्यवान् वै
पुरजसुखसुसिद्धो हिर्जगर्दश्च लेखः ॥35॥

दशमभावस्थमङ्गलफलम्

फुराफतरितसंज्ञः काबिलो नेककिर्दा-
र्नयसमरिह लोके पूजितः साहसी च ।
मिहिरजरजलालआरजेवर्युतो ना
भवति यदि मिरीखःशाहखाने सखी स्यात् ॥36॥

एकादशभावस्थमङ्कलफलम्

जरमखमलमर्ज्यांजर्कशीसाहिवीभि-
स्तुरगरथपदात्यैर्युग्जनश्चारिहीनः ।
यदि भवति जलादुल्फल्कको याप्तिखाने
मदनसमरदक्षः पण्डितः सत्यगन्ता ॥37॥

द्वादशभावस्थमङ्गलफलम्

यदि भवति मिरीखः खर्चखाने गतश्च
स्वजनहृदयभेत्ता कर्कशैर्ना वचोभिः ।
महमहवजजुल्मी साहिदोवेधनः प्राग्
जठरदहनदर्पो नुर्हमेशः परेशान् ।।38।।

।। इति भौमफलम् ।।

अथ लग्नस्थबुधफलम्

साहब् सवारो जितखूबरोमा तुतारदः साहबहिम्मतश्च ।
ताले भवेच्चेत्सततं विनीतो दानी चिरं चात्मजसौख्ययुक्स्यात् ।।39।।

द्वितीयभावस्थबुधफलम्

शीरीसखुन् दानिशवर्ग़नीचतवङ्गरः स्याद्यदि चश्मखाने ।
उतारदो ना स्वजनानुरक्तो भवेद्विनीतः शुभकृत्यमेति ।।40।।

तृतीयभावस्थबुधफलम् ।।

मुरौवती साहबदर्दसंज्ञः प्रभूतमित्रः प्रमदाप्रियश्च ।
उतारदश्चेन्नशरोयशीयंखोनो भवेन्ना खुशरो हमेशः ।।41।।

चतुर्थभावस्थबुधफलम् ।।

पुष्टोऽनपत्योऽथ स वे यथेच्छो दानीश्वरो गीतप्रियः सखी च ।
उतारदः स्याद्यदि दोस्तखाने शीरींसखुन्कार्यगते मृषी च ।।42।।

पञ्चमभावस्थबुधफलम्

सुतान्वितः सुर्रफितद्भवेन्ना युतारदः स्याद्यदि अल्पखाने ।
दानाग्रणीः साबिरसंज्ञकश्च शिगूफरुसाहबहिम्मतश्च ।।43।।

षष्ठभावस्थबुधफलम्

बेरो नरः स्यान्नसि आविधानो वद्खुल्ककः काहिलजाहिलोऽपि ।
बंदूमकाने हि भवेद्बीरुल्फल्को यदा मांधविपक्षयुक् चेत् ।।44।।

सप्तमभावस्थबुधफलम्

तालेवरः सत्यवचा मुसाहिब् परोपकारी जनखूबरी च ।
उतारिदः स्याद्यदि सप्तमे च भवेन्नरः क़ाबिल बामुरौवतः ।।45।।

अष्टमभावस्थबुधफलम्

उमर्दराजः सुतरां सगर्वमेकं पुरं पार्थिवलब्धचित्तम् ।
बेरो विधानं हि नरं प्रकुर्यादुतारदो मार्गमकानगश्चेत् ।।46।।

नवमभावस्थबुधफलम्

दानीश्वरः सत्यगुरुल्लपेतः खुश्री ग़नी धर्मपरस्तवङ्गरः ।
यदा दबीरुल्फलको नशीबखाने भवेत्स प्रथितः शुभङ्करः ।।47।।

दशमभावस्थबुधफलम्

साहब् जलालो मुतमौवलः(?) स्यान्नरेन्द्रमुख्यः शुभकर्मकृन्ना ।
शीरींसखुन्साहबदर्दसंज्ञश्चोत्तारिदश्चेत्खलु शाहखाने ।।48।।

एकादशभावस्थबुधफलम्

तवङ्गरश्चात्मजसौख्ययुक्स्याद्दानाग्रणीर्भूपप्रियस्सिपाही ।
सर्दारकः पाकदिलो दबीरुल्फल्को यदा याफ़्तिमकानगः स्यात् ।।49।।

द्वादशभावस्थबुधफलम्

नापाक्जनैश्चारुगुणैरुपेतो बेतालकः कम्शदवर्बददेः ।
उतारदः स्याद्याः खर्चखाने भवेद्धिरीसोपि च गर्दवर्दः ।।50।।

।। इति बुधफलं समाप्तम् ।।

अथ लग्नस्थगुरुफलम्

मुश्तरी यदि भवेदिह ताले साहिबः खुशदिलो मनुजः स्यात् ।
आमिलः पुरुसखुन् सिरदारः फारसो ह्यकविरो महबूबः ।।51।।

द्वितीयभावस्थगुरुफलम्

मुश्तरी यदि भवेज्जरखाने बजरुगः परमपुण्यमतिस्स्यात् ।
कामिलः कनकसूनुयुतश्च खूबरो हि मनुजो जरदारः ।।52।।

तृतीयभावस्थगुरुफलम्

गाफिलो बहुपराक्रमयुक् स्यान्मानवः परुषवाक् च बखीलः ।
पालको भवति श्रेष्ठजनानां मुश्तरी यदि विरादरखाने ।।53।।

चतुर्थभावस्थगुरुफलम्

अश्वजर्जरकशीरथफीलैर्युग्जनः प्रियतमः खलु राज्ञः ।
मुश्तरी यदि भवेद्धि चहारुम्खानये सकलसौख्ययुतः स्यात् ।।54।।

पञ्चमभावस्थगुरुफलम्

पण्डितः पुरुतरदुद आर्यः पुत्रपौत्रसहितो महबूबः ।
मुश्तरी यदि भवेत्फरजन्दस्यालये न मनुजो जरदारः ।।55।।

षष्ठभावस्थगुरुफलम्

काहिलश्च बहुरोगयुतश्च मानवो बदसखुन्चदशिल्कः ।
मुश्तरी यदि भवेद्रिपुखाने मातुलादिभवसौख्यविहीनः ।।56।।

सप्तमभावस्थगुरुफलम्

फाजिलः सुखयुतः सुविनीतो हम्जवाक् च रमणीसुखयुक्तः ।
फारसश्च चतुरः किल ना स्यान्मुश्तरी यदि भवेज्जनखाने ।।57।।

अष्टमभावस्थगुरुफलम्

बेदिलश्च परदेशरतश्च जाहिलः खलु नरः सगदश्च ।
मुश्तरी यदि हि हन्तभखाने गुस्वरः किल भवेज्ञनमस्तः ।।58।।

नवमभावस्थगुरुफलम्

हज़्रते च खुशपीरजवांश्च खूबरो बहुसुखी च मुशीरः ।
आमिलश्च यदि यख्तमखाने मुश्तरी प्रविभवेत् खलु यस्य ।।59।।

दशमभावस्थगुरुफलम्

पालकीजलजवाहिरफीलः संयुतो विविधवस्त्रविशालैः ।
मुश्तरी भवति शाहमकाने साहबः खलु नरो नसरः स्यात् ।।60।।

एकादशभावस्थगुरुफलम्

साबिरः शुभतनुर्जरदारः फारशी बहुपराक्रमयुक् स्यात् ।
काबिलश्च यदि याफ्तिमकाने मुश्तरी प्रविभवेत्खुशरी स्यात् ।।61।।

द्वादशभावस्थबृहस्तपिफलम्

मुफिलसः कमफहम् गतलज्जो बदसखुंश्च रणभूतलचिन्तः ।
काहिलश्च यदि खर्चमकाने मुश्तरी भवति ना बदफैलः ।।62।।

।। इति बृहस्पतिफलं समाप्तम् ।।

अथ लग्नस्थशुक्रफलम्

अव्वलखाने जोहूरा महबूबं मुकरबं नृपतिम् ।
दानिश्मन्दं मनुजं जरदारं जनखूबरो कुरुते ।।63।।

द्वितीयभावस्थशुक्रफलम्

शीरींसुखुन् मनुष्यं जरजेवर्जर्कशीशालैः ।
यक्मिहरा जरखाने जोहूरा कुरुते च सद्धजं दक्षम् ॥64॥

तृतीयभावस्थशुक्रफलम्

जोह्रा भवति बिरादरखाने चेन्मानवो जातः ।
जोरावरो हरीशः सालस्यः सानुजः साश्वः ॥65॥

चतुर्थभावस्थशुक्रफलम्

ऐयाशो मालदारो नेकीकारश्च फारसश्चेत्स्यात् ।
जोहरा दोस्तमकाने भवति मनुष्यः प्रियंवदश्चाढ्यः ॥66॥

पञ्चमभावस्थशुक्रफलम्

दानीश्वरो मनुष्यः सुतधनधान्यैश्च सङ्कुलो यस्य ।
जोहरा पञ्चमखाने भवति यदा हि महीपतेः प्रीतिः ॥67॥

षष्ठभावस्थशुक्रफलम्

यारोनः कम्सहवद् बेदर्दो जाहिलो जातः ।
खलु जोहरा हि दुश्मनूखाने वै बेदिलो भवति ॥68॥

सप्तमभावस्थशुक्रफलम्

साहबदर्दः कुशलः सकलकलासु फारसो ना स्यात् ।
जोहूरा हफ्तमख़ाने स्त्रीजनचित्ताशुरञ्जको भवति ॥69॥

अष्टमभावस्थशुक्रफलम्

मगरूरो बदखुल्कः स्त्रीधनसौख्यैश्च वर्जितो मनुजः ।
हत्तुमखाने जोहरा भवति वितृप्तं मनो न संग्रामे ॥70॥

नवमभावस्थशुक्रफलम्

नेकीकारः सुभगः खुशरो दानी च मानवो जोहूरा ।
बख्तमकाने मुर्ताज् नशरश्च मज्लिसी भवति स इति ।।71।।

दशमभावस्थशुक्रफलम्

दर्राकोजरदारः पितृगुरुभक्तश्च काबिलो मनुजः ।
जोहूरा शाहमकाने भवति मुशीरश्च साहबो वा स्यात् ।।72।।

एकादशभावस्थशुक्रफलम्

जरदारं महबूबं सिर्दारं वा मुरौवतं मनुजम् ।
याफ्तिमकाने जोहरा मईनं पुरुदत्तं कुरुते ।।73।।

द्वादशभावस्थशुक्रफलम्

साहबखर्चो बदकार् कमसहश्च मानवो ह्युदितः ।
बदअक्ल किल जोहूरा खर्चमकाने हि गुस्वरो भवति ।।74।।

।। इति शुक्रफलं समाप्तम् ।।

अथ लग्नस्थशनिफलम्

ताले यदि स्याज्जुहलो बद्अक्लश्च लागरो मनुजः ।
शठकम्बुरुं बेदिलः वाममतिपूर्णः प्रभुर्भवति ।।75।।

द्वितीयभावस्थशनिफलम्

यावागो बद्हालः कोतोदत्तश्च गुस्वरो जोहूलः ।
जरखाने यदि मनुजो नाढ्यः परदेशगश्चापि ।।76।।

तृतीयभावस्थशनिफलम्

जोरावरो यशीलः खुशदाना च मानवः सभ्यः ।
अनुचरवृन्दसमेतो भवति यदा वै बिरादरे जोहूलः ॥77॥

चतुर्थभावस्थशनिफलम्

मुतफक्किरो बेहोशः परितप्तो मानसो जोहूलः ।
मादरखाने यदि स्यात् कमजोरश्च लागरो भवति ॥78॥

पञ्चमभावस्थशनिफलम्

बदअक्लो मुत्फकिरः सुतसुखरहितश्च काहिलो मनुजः ।
जोहूलः पञ्चमखाने कोतहूदेहश्च जाहिलो भवति ॥79॥

षष्ठभावस्थशनिफलम्

दानीश्वरं जलीलं जनयति मनुजं मुकर्रमं नृपतिम् ।
निर्जितवैरिसमूहं दुश्मनूखाने स्थितो जोहूलः ॥80॥

सप्तमभावस्थशनिफलम्

बदरो जनः कृशाङ्गः कम्फहमश्च मानवो हिर्जः।
जानो वा स्याज्ञोह्ली हफ्तुमखाने यदा भवति ॥81॥

अष्टमभावस्थशनिफलम्

बीमारश्च हरीशो दगालबाजश्च दोजखी मनुजः ।
जोहूल्हस्तुमखाने भवति बखीलः कृपालसो भीरुः ॥82॥

नवमभावस्थशनिफलम्

बख्तबुलन्दः श्रीमान् शीरींसखुनश्च मानवो यदि वै ।
जोह्लो बख्तमकाने बेतालस्व हि कृपालुरपि भवति ॥83॥

दशमभावस्थशनिफलम्

शाहमकाने जोहलच्चेषु दशाफ्ते च मानवः शाहः ।
अथवा भवेन्मुशीरः खुशशुल्कः मुकृती ग़नी नेही ।।84।।

एकादशभावस्थशनिफलम्

साहबदर्दो नेकःशीरींसखुनस्तवङ्गरो ना स्यात् ।
याफ्तमकाने जोहल ईशाः साबिरो रिपुहन्ता ।।85।।

द्वादशभावस्थशनिफलम्

तँगहालो बदफेलः पापासक्तश्च मुफ्लिसो मनुजः ।
जोह्लःखर्चमकाने भवति हरीशः कृपालुरेव स्यात् ।।86।।

।। इति शनिफलं समाप्तम् ।।

अथ लग्नस्थराहुफलम्

अव्वलखाने यदा रासः खिस्मनाकश्च काहिलः ।
मनुजः स्वार्थकतास्याद्भवेद्बेरोतु जाहिलः ।।87।।

द्वितीयभावस्थराहुफलम्

कृजीबाहासिदरासो मालखाने च मुफ्लिसम् ।
करोति मनुजं वाऽन्यदेशे धनसमन्वितम् ।।88।।

तृतीयभावस्थराहुफलम्

पाकः शाहबलः स्याद्वै नेकनामी ग़नी सखी ।
शीयुमूखाने यदा रासः प्रभवेन्मनुजो धनी ।।89।।

चतुर्थभावस्थराहुफलम्

रासश्चेद्दोस्तखाने स्यात् परेशानो मुसाफिरः ।
नादानोऽपि च वादी च सौख्यहीनो विपक्षकः ।।90।।

पञ्चमभावस्थराहुफलम्

पिसरखाने स्थितो रासः पुत्रसौख्यविवर्जितम् ।
बेहोशं दर्दशिकमं नादानं कुरुते नरम् ।।91।।

षष्ठभावस्थराहुफलम्

म्लेच्छावनीशाद्द्रव्याप्तिर्दिलं च साहबं नरम् ।
बद्खाना(व)स्थितो रासः करोति रिपुसंक्षयम् ।।92।।

सप्तमभावस्थराहुफलम्

हिर्जगर्दश्च बेतालो गुस्वरो बद्जनो भवेत् ।
हफ्तम्खाने यदा रासः कलही मनुजस्तदा ।।93।।

अष्टमभावस्थराहुफलम्

हस्तम्खाने यदा रासः शरीरी स्यान्मुशाफिरः ।
बेदीनः खिश्मनाकः स्याद् बदकारश्च मुफ्लिशः ।।94।।

नवमभावस्थराहुफलम्

बख्तखाने यदा रासः प्रभवेन्मनुजस्तदा ।
जवाहिर्जर्कशीयुक्तः साहबः सौख्यवान्नरः ।।95।।

दशमभावस्थराहुफलम्

रासो बादशाह खानेभवेज्ञोरावरो गनी ।
विपक्षपक्षरहितो मुईशः पुर्तरुह्वतः ।।96।।

एकादशभावस्थराहुफलम्

याफ्तखाने भवेद्रासो जायते नहि साहबः ।
बेकारश्च कर्जमन्दः कलही मनुजस्तदा ।।97।।

द्वादशभावस्थराहुफलम्

रासः स्थितो यदा यस्य खर्चखाने भवेत्तदा ।
कलहप्रियबेकारः कर्जमन्दश्च मुफ्लिशः ।।98।।

।। इति राहुफलं समाप्तम् ।।

अथ सर्वभावस्थकेतुफलम् ।।

यस्मिन्भावे फलं यद्धि राहोः प्रोक्तं शुभाऽशुभम् ।
तद्वदेव विजानीयात्तत्रैव शिखिनः फलम् ।।99।।

।। इति ग्रहाणां द्वादशभावफलानि ।।



अथ राजयोगाध्यायः

यदा माहताबो भवेन्मालखाने मिरीखोऽथवा मुश्तरी बख्तखाने ।
अतारिद् बिलग्ने भवेद्वख्शपूर्णो भवेद्दानदारोऽथवा बादशाहः ॥1॥

भवेदाफतावो यदा षष्ठखाने पुनर्दैत्यपीरोऽथ केन्द्रे गुरुर्वा ।
सुजातः शुतर्फीलताज्याहयाढ्यो जरीजर्जरावस्यदातश्चिरायुः ॥2॥

यदा चस्मखोरा भवेद्दोस्तखाने ततो मुस्तरी दोस्तखानेऽथ लग्ने ।
अतारिद्धनस्थो बृहत्साहिबी स्याद् बृहद्(?) पमखमलखजानासुपूर्णाः ॥3॥

तृतीये भवेदाफताबस्य पुत्रो यदा माहताबस्य पुत्रो विलग्ने ।
भवेन्मुश्तरी केन्द्रखाने नराणां बृहत्साहिबीतस्य ताले रुजुः स्यात् ॥4॥

यदा मुश्तरी पञ्चखाने मिरीखो यदा बख्तखाने रिपौ आफताबः ।
नरो वा अकूफो भवेत्कुञ्जरेशो बृहद्रोशनो वाहिनीवारणाढ्यः ॥5॥

अतारिद् विलग्ने सुखे माहताबो गुरुर्बख्तखाने तमो लाभखाने ।
जहानस्य खूबी भवेन्नेकबख्तः खजाना गजाढ्यो मुलुक्साहिबी स्यात् ॥6॥

यदा देवपीरो भवेद् बख्तखाने पुनर्दैत्यपीरोऽथवा स्वप्रखाने ।
अतारिद्विलग्ने तृतीये मिरीखः शनिर्लाभखाने नरः काबिलः स्यात् ॥7॥

हमल्माहताबो व्यये आफताबो यदा मुश्तरी केन्द्रखाने त्रिकोणे ।
भवेन्मानवो देवतेजस्कराढ्यो बृहत्साहिबी बख्तखूबी कमालः ॥8॥

खजानागजाढ्यो भवेल्लश्कराढ्यो जहानप्रियो मुश्तरी जायखाने ।
मिरीखोऽथ लाभे बुधः पञ्चखाने शनिः शत्रुखाने नरः काबिलः स्यात् ॥9॥

कमर् केन्द्रखाने शनिः शत्रुखाने त्रिकोणेऽथवा मुश्तरी चश्मखोरा ।
सजातो नरः साबिरो सद्गुणज्ञो भवेच्छायरो मालदारोऽथ खूबी ॥10॥

मिरीखोऽथवा खेशशम्तौलिखाने गुरुर्मौतराशौ जया माहताबः ।
भवेज्ञन्मखाने यदा चश्मखोरो जुलीखप्रहर्ता जहानप्रचण्डः ॥11॥

धनस्ते कुमुद्बन्धुषष्ठे रविः स्यात् सखत्र्योम्नि बिच्चेति विद्वान् कविश्च ।
बृहत्साबरी शालमखू(म)लूबनातः शुतुर्फीलफानूसतम्बूकनातः ॥12॥

आयुख़ाने चश्मखोरा मालखाने च मुश्तरी ।
राहु जो पैदा मकाने शाह होवे मुल्कका ॥13॥

यदा मुश्तरी कर्कटे वा कमाने यदा चश्मखोरा जमी वासमाने ।
तदा ज्योतिषी क्या लिखे क्या पढेगा हुवा बालका बादशाही करेगा ॥14॥

यदा चश्मखोरा भवेल्लग्नखाने तदा मुश्तरी बख्तखाने विलग्नात् ।
स जातः शुतुर्फीलजातीहयाढ्यो जरीजर्जरी वक्तदाता चिरायुः ॥15॥

आफताबो मालखाने यस्य जन्मनि च ध्रुवम् ।
सकलरोजीमुश्किलं पडै फांके मुफ्लिसम् ॥16॥

आयुखाने चश्मखोरा मालखाने मुश्तरी ।
सबाबूखाने चन्द्रदीदम् बादशाहम्बर्बरी ॥17॥

हमल् आफताबो वृषे माहताबो यदा मुश्तरी केन्द्रखाने त्रिकोणे ।
भवे मानवो दौलतो लश्कराढ्यो बृहत्साहिबी तस्य खूबी कमालः ॥18॥

हमल् आफताबो वृषे माहताबस्त्रिकोणेऽपि वा मुश्तरी चश्मखोरा ।
नरो जायते राहरासन् गुणज्ञो भवेच्छायरो मालदारोतिखूबी ।।19।।

यदा मुश्तरी कर्कटे वा कमाने झषे खेटपुत्रो वसेत्कारखाने ।
समं वीक्षते खूबखेटाः समस्ता भवेन्मदर्वं दर्दयन्तु दयालुः ।।20।।

यदा भाग्यमालिक भलेघर पड़े कमाकर सुदौलत खजाने भरै ।
करैंगे जबख्शी अमीरी सुफल वजीरी अमीरी करैं बेफिकर ।।21।।

यदा चश्मखोरा भवेद् हफ्तखाने शशी दोस्तखाने मिरीखोऽथ नक्रे ।
सुरत्(?)कमालो नरो दीनदारो गनीमप्रहन्ता जहानप्रचण्डः ।।22।।

जमीजोऽथ नक्रे शनौ मौतखाने गुरौ माहराशौ जरे माहताबः ।
भवेज्ञन्मकाले नरो वा उदारो गनीमप्रहन्ता जहानप्रचण्डः ।।23।।

यदा मुश्तरी केन्द्रखाने त्रिकोणे यदा वख्तखाने रिपौ आफताबः ।
अतारिद् विलग्ने नरो बख्तपूर्णस्तदा दीनदारोऽथवा बादशाहः ।।24।।

।। इति खेटकौतुकं समाप्तम् ।।



2

द्वात्रिंशद्योगावली

योग नामानि -

मुक्ताविल्लकाविल्ललालीललत्तारिहागोशनादोशनाचीनकोशाः ।
कलावारवारासमासिल्लदिल्ला तथा बादलामादलाष्टीययोगाः ।।

कुलाबः कुलाली खुशाला खुशाली फलूशा फलूशी बदारा बदारी ।
तमालातमालीतमीतेगतेगीजमीजीवगाश्चैव खंजाबयोगाः ।।

1. अथ 'मुक्तावली' - योगमाह

या मित्रमूर्त्योः खलु पापखेटाः अनुक्रमे (स्युः यदि) भावचक्रात् ।
क्लेशं विवादं नृपतेर्भयं च मुक्तावलीयोगहृतं (दत्तं) च कष्टम् ।।

2. अथ काबिल्ल - योहमाह

इन्दुज्ञजीवभृगुपुत्रगते धने च आपोक्लिमे च रविराहुकुजार्कपुत्राः ।
लक्ष्मीप्रवृद्धि कुरुते ह्यतुलं च तेजो राज्यास्पदं भवति काबिलयोगजेन ।।

3. अथ लालीलयोगमाह -

मित्रे धनस्थे यदि वा विलग्ने, सौम्याश्च खेटा नरसौम्यवर्गे ।
क्रूराः षडाये धनधान्ययुक्तो लालीलयोगो यदि हायनेऽस्मिन् ।।

4. अथ लत्ता - योगमाह

अरिमदनधनेषु क्रूरखेटाश्च याते तनुपतिव्ययवित्ते कोऽपि सौम्येषु ह्येकः।
भवति रिपुविवादो मानसौख्यं च जातौ क्षणक्षणमपि सौख्यं योगलत्तासमाह्वे।।

5. अथ रिहा - योगमाह

तपनइन्दुजसिंहजलग्नगाः शुभग्रहाः किल कोऽप्यविलोकितः ।
स्वजनशोकविनाशरते रतिं यदि च ह्यब्दगतो रिहयोगजः ।।

6. अथ गोशना - योगमाह

छिद्रनाथ नवपञ्चमषष्ठगो वित्तनाथ यदि क्रूरनवांशके ।
दशनधान्यदशा च रिपौ (यदा) वसनवित्तविनाशनगोशना ।।

7. अथ दोशना - योगमाह

द्विती(त) यभाग्ययमारविधूसतातनुपतिर्निर्बलो निधनाश्रितः ।
तदपयोगकरः खलु दोशना करणनाश(?) विनाशति वर्षगे ।।

8. अथ चीन- योगमाह

सितगुरुः शशितो यदि तुर्यगस्तपन पुत्रविधुर्निजलग्नगः ।
बहुलधान्य-धनागमचीनगो गजतुरङ्गसुखासनमग्रतः ।।

9. अथ कोश - योगमाह

प्रालेयराशौ यदि पापखेटा लग्ने धने वा व्ययभावयाताः ।
मृत्युकरो वा धनहीनता वा गता प्रतिष्ठा यदि कोशयोगः ।।

10. अथ कलावार - योगमाह

उदयजन्मलग्नं यदा हायनेऽस्मिन् ज्वरः कम्पनं श्वासकासश्च कण्डुः ।
कलावारयोगा यदा हायनेऽस्मिन्नथारिष्टनाशो यदा केन्द्रवर्ती ।।

11. अथ वारा - योगमाह

झषे गुरुः शुक्रमहीसुताश्च लग्ने गते वा हिबुके विलग्नाः ।
स्वर्णं च रत्नं लभते मनुष्यो भवेद्धि वारा यदि योगवर्षे ।।

12. अथ समा - योगमाह

जन्म (नव) भां (मां) शगते रिपुमृत्युगे गगनबन्धुतमो मृति पश्यति ।
यदि करोति कफादनुश्लेष्मणोर्भयमतीव समा खलु योगकः ।।

13. अथ सिल्ल - योगमाह

शनिः कुम्भराशौ लवैर्वर्द्धमाना घटांशैर्गतो मन्दमूर्तौ च ह्यब्दे ।
नरो भूपमानं विवाहादिकार्ये मतो हेमलब्धिः सिलायोगसंस्थे ।।

14. अथ दिल्ला - योगमाह

रविर्जन्मलग्नाधिपो व्योमभावे यदा व्योमभावाधिपस्तुङ्गवर्ती ।
तदा कष्टनाशो महत्तेजवृद्धिर्गजाश्वादि प्राप्तिर्दिलायोगमध्ये ।।

15. अथ वादला - योगमाह

धने लाभगे राहुचन्द्रोच्चसंस्थे नवांशेऽपि सिंहे गुरौ वक्रभागे ।
महालाभकारी विधुः पुत्रयुक्तो धनं सञ्चितं वादलायोगमध्ये ।।

16. अथ मादला - योगमाह -

तृतीयपञ्चमभाग्यतथाऽऽयगे शुभखलाह्यथवा निजस्वोच्चगाः ।
भवति योगरयं (योगकृते) यदि मादला सकलसिद्धिकरस्थसुखो जनः ।।

17. अथाष्टीय - योगमाह

रवौ सिंहराशौ गुरौ चापमध्ये मही पुत्रलाभे यदा दक्षभागे ।
धनं वस्त्रभोगी ह्यहङ्कारवृद्धिः परं (नरं) तेजतेजी नरोऽष्टीययोगे ।।

18. अथ कुलाब - योगमाह

भृगुर्ह्योजराशौ यदा कन्यकादौ अजान्ते गुरुर्युग्मभांशे च लग्ने ।
रिपोर्नाशनं स्त्रीविलासं सुखं च नरः सर्वसिद्धिं कुलाबादि योगे ।।

19. अथ कुलाली - योगमाह

ग्रहा क्रूरसौम्या अरिस्थे च रिष्टे सुरेज्यो विधः सैहिकेयस्त्रिकोणे ।
नृपात्सौख्यप्राप्तिर्जयः शत्रुपक्षात्तदा द्रव्यलाभो कुलाली च योगे ।।

20. अथ खुशाला - योगमाह -

अरिस्थे च क्रूरा भवेद् यस्य खेटा भृगुज्ञो विधुश्चाम्बरे जीव वापि ।
नरो ग्रामलाभं धनं धान्यवस्त्रं कलत्रादिसौख्यं खुशाला च योगे ।।

21. अथ खुशाली - योगमाह-

तृतीये शुक्रो गुरुः (रौ) सार्द्धचारी विधुर्मन्दयुक्तो यदा लग्नवर्ती ।
प्रभुत्वं च वृद्धिः सुखं सम्पदादेर्हिरण्यादियुक्तः खुशाली च योगे ।।

22. अथ फलूशा योगमाह -

लाभे व्यये लग्नगते च दुष्टे विद्यारिपुस्थे मदने च सौम्ये ।
प्राप्तेश्च काले फलहीनता स्यात्सर्वार्थनाशो(शं) कुरुते फलूशा ।।

23. अथ फलाशी - योगमाह

धने व्यये मृत्युरिपोऽस्तगे वा पापाश्च सौम्या निबला वि(पि) चक्रे ।
क्लेशं विवादं पशुपीडनं च फलाशी च योगे जनैः सह विरोधः ।।

24. अथ बदारा- योगमाह -

लग्नाधिपो भौमयुतश्च रन्ध्रे रन्ध्राधिनाथो व्ययगे रिपुस्थे ।
करोति कष्टं रिपुणा विवादं शस्त्राभिघातं कुरुते बदारा ।।

25. अथ बदारी - योगमाह -

तनुपतौ व्ययभावगते रवौ सुरपतौ (पतिः) रिपुगे च तथाष्टमे ।
भवति रोगकरो धनहानिदो यदि नु ह्यब्दगतश्च वदारिजः ॥

26. अथ तमाल - योगमाह

लग्नेश्वरो व्योमकलत्रतुर्ये तद्भावनाथो यदि तुर्यवर्ती ।
राज्याधिपं वाहनसौख्यमे शत्रुक्षयं बाहयते तमालम् ॥

27. अथ तमाली - योगमाह

लग्नाधिपो भवति भौमयुतश्च दशमे कर्माधिपे वसति लग्नगतेऽपि धूने ।
सन्तानसिद्धिसुखदं नृपदत्तमानं धान्यादिभूषणधनं कुरुते तमाली ॥

28. अथ तगी - योगमाह

सुतेशो गुरुर्ज्ञो विधुः कीटराशौ परं भाग्यशुक्रो वृषे वाथ मीने ।
तदा धर्मवृद्धिश्च सन्तानसौख्यं धनं धान्यवस्त्रं तगीयोगमध्ये ॥

29. मथ तेग(ज) - योगमाह

शुक्रज्ञभाष्करविधुः क्षितिजात्मछिद्रे लग्ने यदा भवति जीवयुते च दृष्टे ।
नानाविधं सपदिभोगरतिश्च लाभं व्यापारवृद्धिमतुलां कुरुते च तेगः ॥

30. अथ तेगी - योगमाह

अरिर्धर्मलाभे व्यये पापखेटा व्ययाज्ञन्मवर्षाधिपो केन्द्रगो वा ।
तदा राज्यमानं वरं शत्रुनाशः सुखं सर्वभावे यदा योगतेगी ॥

31. अथ ज(य)मी - योगमाह

भृगुगृहे सुरराजपुरोहिते गुरुगृहेऽपि वसति भृगुनन्दने ।
फणपरेऽपि (पणकरेऽपि) तमे च चतुर्थगे द्विगुणलाभकरे जमियोगकः ॥

32. अथ जीव - योगमाह

यदि पराक्रमलाभगते रवौ शुभखगा हिबुके च कलत्रगे ।
सुतसुखं कुरुते विपुलं धनं कीर्तिं शुभां हि करोति च जीवगः ।।

33. अथ खंजाब - योगमाह

लग्नेश लाभेश अथवा(?) सुतेश तुर्येशकर्मेशद्यनेशसंस्थे ।
तद्भावसौख्यं बहुलं च तेजः खंजाबयोगो यदि हायनेऽस्मिन् ।।

।। इति नवाबखानखानाकृत - त्रयास्त्रिंशद्योगावलिः समाप्ता ।।



3

गङ्गाष्टकम्

(श्रीविरामखानसूनुरहीमखानखानाकृत(म्) गङ्गाष्टकम्)

1. अच्युतचरणतरङ्गिणि! शशिशेखरमौलिमालतीमाले ।
त्वयि तनुवितरणसमये हरता देया न मे हरिता ॥

2. हरिं विरञ्चिविष्णुपूज्यपादवारिधारिणी
प्रताप-केतु- पट्टिकाम्बुयष्टिका - विहारिणी
शशाङ्क-कान्ति-पूरकेण पाप - कूटकन्दिनी
जगत्त्रिदोषतस्तनुं पुनातु जह्नुनन्दिनी ॥

3. शिवोत्तमाङ्गवेदिका-विहारसौख्य-कारिणी
ततो भगीरथाङ्गाङ्ग-मर्त्यलोक-चारिणी ।
त्रिमार्गगा त्रितापहा त्रिलोकशोकखण्डिनी
जगत्त्रिदोषतस्तनुं पुनातु जह्नुनन्दिनी ॥

4. हिमाद्रि-कन्दरा-विहार-सिद्धचारणाङ्गना
सुगीत-नृत्य-तालभेद-कामकेलि-नन्दना ।
सुकुञ्ज-पुञ्ज-वञ्जुल-प्रफुल्लसूनु-गन्धिनी
जगत्त्रिदोषतस्तनुं पुनातु जह्नुनन्दिनी ॥

5 सरस्वती-प्रपूरसूर-कम्यकाम्बु-सङ्गिनी
मुनीन्द्रवृन्दवन्दिता त्रिवेणिका तरङ्गिणी ।
मुमुक्षुसङ्गसेविता सुतीर्थबुद्धिवन्दिनी
जगत्त्रिदोषतस्तनुं पुनातु जह्नुनन्दिनी ॥

6. चकोर-चक्रवाक-हंसवृन्द-कूल-राजिता
मृणाल-खण्ड-धूम-वायु-पूत-सत्त्व-सज्जिता ।
शवाङ्ग-गन्ध-पूत-हारिवारिराशिसन्दिनी
जगत्त्रिदोषतस्तनुं पुनातु जह्नुनन्दिनी ॥

7. रसाल-वेतसी-तमाल-साल-कुञ्जपावनी
अनेकदेश-कूल-वात-कालभीतिदण्डिनी ।
मयूर-कोकिला-प्रमत्त-तीरशोभितावनी
जगत्त्रिदोषतस्तनुं पुनातु जह्नुनन्दिनी ॥

8. नरेन्द्रपुत्र मुक्तिदा सुरेन्द्रलोक-साधनम्
स्वसेवकाय दात्रिका सुतं सुमित्रकं धनं ।
नदीशपूर-सङ्गमेन विश्वताप-कन्दिनी
जगत्त्रिदोषतस्तनुं पुनातु जह्नुनन्दिनी ॥

9. नवप्रवाह-सञ्जलदद्भिलोलवीचि-दोलितम्
स्व-मीन-कङ्कचर्चितं श्रुगाल-काक-भक्षितम् ।
नरं विलोक्य सादरं विकुण्ठलोकगामिनं
वदन्ति देवि देवता भृशं त्वदीयविस्मयम् ॥

10. विधेहि देवि मे मतिं त्वदीयवारिसेवने
शुभेततरेकदा प्रतीतिरस्तु मां (?) बुधे ।
तवाम्बुपानमादरात् प्रकुर्वतः प्रतिक्षणं
त्वदीयवीचिमिक्षतः प्रयातु देवी मे दिनम् ॥

11. मुरारि-पाद-सेविना विरामखान-सूनुना
शुभाष्टकं शुभं कृतं मया गुरुप्रभावतः ।
पठेदिदं सदा शुचिः प्रभातकालतस्तु यः
लभेत वाञ्छितं फलं स जाह्नवीप्रभावतः ॥

॥ इति श्रीविरामखानसूनुरहीमखानखानाकृतं गङ्गाष्टकं सम्पूर्णम् ॥



4

रहीम् काव्य

श्लोक - 1

अनीता नटवन्मया तव पुरः श्रीकृष्ण या भूमिका
व्योमाकाशखखाम्बराब्धिवसुवत् (?) त्वत्प्रीतयेऽद्यावधि ।
प्रीतस्त्वं ननु चेन्निरीक्ष्य भगवन् स्वप्रार्थितं देहि मे
नो चेद् ब्रूहि कदापि मानय पुनस्त्वेताद्दशीं भूमिकाम् ।।

श्लोक - 2

रत्नाकरोऽस्ति सदनं गृहिणी च पद्मा
किं देयमस्ति भवते जगदीश्वराय ।
राधागृहीतमनसेऽमनसे च तुभ्यं
दत्तं मया निजमनस्तदिदं गृहाण ।।

श्लोक - 3

अहल्या पाषाणः प्रकृतिपशुरासीत् कपिचमू-
गु होऽभूच्चाण्डालस्त्रितयमपि नीतं निजपदम् ।
अहं चित्तेनाश्मा, पशुरपि तवार्चादिकरणे,
क्रियाभिश्चाण्डालो, रघुवर न मामुद्धरसि किम् ।।

श्लोक - 4

यद् यात्रया व्यापकता हता ते
भिदैकता, वाक्परता च तुल्या ।
ध्यानेन बुद्धेः परला परेश
जात्याऽजता क्षन्तुमिहार्हसित्वम् ।।

श्लोक - 5

रूपं रूपविवर्जितस्य भवतो ध्यानेन यद्वर्णितं
स्तुत्याऽनिर्वचनीयताऽखिलगुरोर्दूरीकृता यन्मया ।
व्यापित्वञ्च विनाशितं भगवतो यत्तीर्थयात्रादिना
क्षन्तव्यं जगदीश तद्विफलतादोषत्रयं मत्कृतम् ।।

श्लोक - 6

दृष्ट्वा तत्र विचित्रितां तरुलतां, मैं था गया बाग में
काचित्तत्र कुरङ्गशावनयना, गुल तोड़ती थी खड़ी ।
उन्मदभ्रूधनुषा कटाक्षविशिखैः, घायल किया था मुझे ।
तत् सीदामि सदैव मोहजलधौ, हे दिल शुकारो गुज़र् ।।

श्लोक - 7

एकस्मिन् दिवसावसानसमये, मैं था गया बाग़ में
काचित्तत्र कुरङ्गबालनयना, गुल् तोड़ती थी खड़ी ।
तां दृष्ट्वा नवयौवनां शशिमुखीं, मैं मोह में जा पड़ा
नो जीवामि विना त्वया श्रुणु प्रिये, तू यार कैसे मिले ।।

श्लोक - 8

अच्युतचरणतरङ्गिणि शशिशेखरमौलिमालतीमाले ।
मम तनुवितरणसमये हरता देया न मे हरिता ।।

अच्युतचणतरङ्गिणि, शिव-सिरमालतीमाल ।
हरि न बनायो सुरसरी, कींजो इंदव-भाल ।।



5

मदनाष्टक

1. वहति मरुति मन्दं मैं उठी राति जागी
   शशिकरकर लागे सेजको छोड भागी ।
   अहह विगतः(?) स्वामी मैं करूं क्या अकेली
   मदन शिरसि भूयः क्या बला आन लागी ।।

2. विगतघननिशीथे चाँद को रोशनाई
   सघनघननिकुञ्जे कानूह वंशी बजाई ।
   सुतपतिगतनिद्रा स्वामियाँ छोड भागीं
   मदन शिरसि भूयः क्या बला आन लागी ।

3. हरनयनहुताशज्वालया जो जलाया
   रतिनयनजलौघैः खाख बाकी वहाया ।
   तदपि दहति चित्तं मामकं क्या करौंगी
   मदन शिरसि भूयः क्या बला आन लागी ।।

4. हिम रितु रतिधामा सेज लोटौं अकेली
उठत विरहजाला क्यों सहौं री सहेली।
इति वदति पठानी मन्मदाङ्गी विरागी
मदन शिरसि भूयः क्या वला आन लागी ॥

5. शरद निशि निशीथे चाँद की रोशनाई
सघन वन निकुंजे कान्ह वंशी बजाई।
रति, पति, सुत, निद्रा, साइयां छोड़ भागी
मदन शिरसि भूयः क्या बला आन लागी ॥

6. पकरि परम प्यारे सांवरे को मिलाओ
असल अमल प्याला क्यों न मुझको पिलाओ।
इति वदति पठानी मनमथांगी विरागी
मदन शिरसि भूयः क्या बला आन लागी ॥

7. मनसि मम नितान्तं आयकें वासु कीया
तन धन सब मेरा मान तैं छीन लीया।
अतिचतुरमृगाक्षी देखते मौन भागी
मदनशिरसि भूयः क्या बला आन लागी ॥

8. कठिन कुटिलकारी देख दिलदार जुलफें
अलि कलित बिहारी आपने जी की कुलफें।
सकल शशिकला रोशनी हीन लेखौं
अहह ब्रजलता को किस तरह फेर देखौं ॥



Appendix - A

Vocabulary of Non-Sanskrit Words

अकविर - great; उत्तम, श्रेष्ठ
अकूफ - intelligent; मेधाविन्
अक्ल(खान) - Fifth zodiac sign; पञ्चमराशि स्थानं
अतारिद् - Mercury; बुधः
अव्वल (खान) - first place; प्रथम स्थानं
अमीरी - Kingship; ऐश्वर्य
आफताब - Sun; सूर्यः
आमिल- active; man of action; कर्मोद्युक्त
आसमान - sky; आकाशः
उतारद - Mercury; बुधः
उमर् - age; आयुः
उमर्द (राज) - long-lived; दीर्घायुः
उष्ट्रघ - vindictive; असहिष्णु
ऐयाश - debauch; कामावेशः
कदर्दान् - appreciating the merits of others; गुणागुणज्ञानी
क्नात - enclosure made of cloth; जवनिका
कमजोर - weak; निर्बलः
कमफहममन - मन is redundant lacking in intelligence; समधिक
कमफहम् - speaking little and unintelligent both; मितभाषी
कमफहमत - speaking little and unintelligent both; मितभाषी
कमर् - Moon; चन्द्रः
कमशहवत - less passionate; न्यूनशीघ्रकोपिन्
कमान - bow; धनुः
कमाल - perfect man; परिपूर्ण मनुष्यः
कम्शहव - impatient of others; असहनशीलः
कम्शहवत् - not very passionate; न अतीव शीघ्रकोपिन्
कम्बुरु - ugly; विकृत
कर्जदार - debtor; ऋणग्रस्त
कर्जमन्द - borrower; ऋण याचकः
काबिल - able, fit; समर्थः
कामिल - perfect; कुशलः
कारखान - factory; पण्यनिर्माणस्थानं
काहिल - idle; कार्यविमुख
काहिलजाहिल - indolent and ignorant; कार्य विमुख अज्ञश्च
किरीह - bad; ugly; विकृत
कोतह - short; ऊन, अपर्याप्त
कोतोदस्त - always remaining poor; सदा निर्धनः

कजना, खजान - Treasury; कोशः निधिः

खर्च (खान) -

खिश्मना (क्) - ill-tempered; गुत्सित स्वभाव

खुबरू - handsome; सुंदरम्

खुबरो - handsome; सुंदरम्

खुबरोमस्त - handsome and self-contented; सुंदरम् च आत्मतुष्ट

खुशदिल - प्रसन्न चित्तः

खुशदिला - in a cheerful spirit; सानंद चित्तं

खुशपीरजबान् - मधुरभाषी

खुशरू - cheerful; सानंद, प्रफुल्ल

खूब - auspicious; शुभ मंगल

खूबरू - handsome; सुंदरम्

खूबरोह - handsome; सुंदरम्

खूबी - good; auspicious; शुभ

गनी - rich; धनी

गलीम - enem;

गर्दवर्द - vagabondising; आवर्दगर्दी; स्वेच्छा चारनम्

गाफिल - negligent; असावधान

गुल्लरु - looking like a rose; पुष्पमिव

गुस्सवर्व - angry; क्रोधः

गुस्सवरमुद्दाम् - always angry; सदाक्रोधिन्

गुस्स्वर - angry; सरोष, कुपित

चलोजम्बर - victorious; विजयिन्

चश्मखन् - defective may be चशमजखम्

चश्मखान - second zodies sign; द्वितीयराशि स्थानं

चस्मखोरा - Venus; शुक्रः

चहारुम्खान - fourth zodiac sign; चतुर्थराशि स्थानं

जखूमी - wounded;

जन (खान) - seventh zodiac sign; सप्तमराशि स्थानं; जन is abbreviated for मीजाम् - Libra; तुलाराशिः

जन खूबरो - with a beautiful wife;; सुंदरपत्नीकः; जन (wife) खूबरु (beautiful)

जनमस्त - fond of women (Ladies' Man); स्त्री अनुरक्तः

जबखुशी - at will; ससंकल्पः

जबर्कमर - when the moon is in the ascendant; यदा चंद्रः अधिरोहिन्

जवाहिर् - jewel; रत्नं, मणि

जनीज - जमीज for मिरीख? second; द्वितीय

जमील - beautiful; सुंदरम्

जर - wealth; संपत्तिः

जरदार - rich; धनिन

जरी - garment with golden threads; सुवर्णसूत्रपोतिका

जर्कशो - garments made of golden threads; सुवर्णसूत्रपोतिका

जर् and जरकशो - wealth and garment made of golden threads; सुवर्णसूत्रपोतिका

जर्जरी - जर् and जरी riches जरी - wealth and garment made of golden threads; सुवर्णसूत्रपोतिका

जर्जबाहिर - riches & jewels; संपन्नः, रत्नः

जलादुल्फल्कक - Mars; मंगलः

जलाल - glory; यशस्

जलील - glorious; यशस्वत्

जशन - joy; happinss; आनंदः, हर्षः

जहान - world; विश्वं

जानी - adulterer; परस्त्रीगामिन्

जरजेवर् - riches & ornaments; संपत् एवं आभूषणम्

जाहिल - follish, opposite of Alim; मूर्ख, मूढ

जिहिल - ignorance; अज्ञानं, अविद्या

जुलुमजङ्ग - tyranny and war; जनमर्दनं च युद्धं

जुहल जोहल, जोह्ल जोह्ली - Saturn; शनिः

जोरावर - strong; बलशालिन्

जोहरी - examiner of jewels; रत्नपारखी

जोहा, जोहरा, जोर्ही -Venus; शुक्रः

तङ्गदिल - narrow-minded; कुत्सितमनः

तङ्गहाल - poverty-stricken; indigent; निर्धनः दीन

तवङ्गर - rich; धनी

तम्बू - tent; पटमण्डपः

ताज्या - planquin?

ताल - birth-moment

तालेवर - in an auspicious birth-moment; fortunate

दगाबाज - deceitful; वंचकः

दबीरुल्फलक् - Mercury; बुधः

दर्दशिकम - stomach-trouble; उदरबाधः

दर्राक - self-willed; obstinate; प्रतिनिविष्ट

दानिश्मन्द - very intelligent; ripe in intellect; savant-like; विद्वान्

दिल - heart; मनस्

दीनदार - pious; पवित्रः, धार्मिकः

दोजखी - to go to hell; नरकंगतः

दोस्त (खान मकान) - fourth zodlac sign; चतुर्थराशि स्थानं

दौलत - wealth; संपत्ति

नदिल् पिशर् मकान - in the fifth zodiac sign; पञ्चमराशि स्थानं
नशरोयशीयु (खान) - third zodiac sign; तृतीयराशि स्थानं
नसर - victorious; विजयिन्
नसिआ - forgetful
नसीब (खान) - ninth zodiac sign; नवमराशि स्थानं, Literally नसीब means luck; भाग्यं
नादान - ignorant, foolish; मूर्खः
नापाक - impure; अपवित्र
नेक - virtuous; पुण्यधर्मशील
नेककर्दार - doing good deeds; सदाचारस्वभावः
नेककिर्दार - doing good deeds ; साधुस्वभावः
नेकनामी - famous; noted; प्रसिद्धः
नेकीकार - doing good to others; परोपकारी
नेही - affectionate; ; स्निग्धः
पञ्ज (खान) - should be पञ्जुम ; fifth; पञ्चम
परेशानक - distracted; विक्षिप्त, व्यग्र
पाक - holy; पवित्रः
पाकदिल - pure-hearted; पवित्रमनस्
पालकी - palanquin
पिशर - son; पुत्रः
पीर - saint; साधु, तपस्वी
पुरतरुद्दत - at a loss what to do; नष्टेसति किं कर्तव्यम्
पुरफितरित - scheming; युक्तिमत्
पुरसखुन - full of speech; i.e. endowed with oratorial gift;
पेष (खाना) - Ninth zodiac sign; नवमराशि स्थानं
पैदा (मकान) - birth; जन्म
फरजन्द - son-daughter; progeny; पुत्रः, पुत्री, संतति
फाजिल - learned; विद्वान्
फांके - extremey; अतिशयः
फानूस - lamp; दीपः
फारस - horseman; आश्विकः
फारसी - Persian; पारसीक
फारसीय - Persian; पारसीक
फील - elephant; गजः
बक्त - destiny; नियति
बखील - miser; कृपण
बख्तबलन्द - extremly lucky; अतिभाग्यं
बख्तमकान, वख्तमखान - ninth zodiac sign; नवमराशि स्थानं
बख्श - gift; दक्षिणा
बजजुलमी - inflicting injury; दौष्ट्यापघातः
बजीर - minister; मन्त्री

बजोरन्नेस्तदर् खानये - having no influence at the court; सभायाम् प्रभावरहितः

बद अक्ल - indiscreet in action; अलसः

बंदखाना - sixth zodiac sign; षष्ठराशि स्थानं

बदशुल्कक - using harsh words opposite to शीरींसखुन; कटुभाषी

बदफेल - who acts wrongly; a man of loose character; दुराचारः

बदशकल - of a bad appearance; कुरूपः

बदकार् - wicked action; doing wrong deeds; दुष्टः, दुर्जनः

बद्सखुन् - rude-speaking; rude in speech; कटुभाषी

बद् हाल - in miserable plight; दयनीयस्थितिः

बनात - broad cloth; विशाल वस्त्रं

बादशाह - King; राजन्

बादशाहवर्वरी - Some word in the same of मन्त्री वजीरी

बिरादर् - खान third zodiac sign; तृतीयराशी स्थानं

बीमार - diseased; व्याधिग्रस्त

बुजरुग - great; highly respected; आदरणीयः

बेकार- useless; निरर्थक, without employment; वृत्तिरहितः

बेखुशी - unhappy; दुःखं

बेताल - happy; सुखं

बे(व)दर्द - cruel; निष्ठुर

बेदिल - cruel; नृशंस, निष्करुण

बेदीन - impious; irreligious; धर्मभ्रष्टः

बेफिकर - without worries; चिंतारहितः

बेमुरौवत् - without any regard for others; दयाहीनः

बैर - Enmity; शत्रुत्वं

बेरोतु- probably बदरु probablTest wrong;

बेहोश - unconscious, senseless; निःसंज्ञ, मूर्च्छितः

मख्मल - velvet; मृदुक

मगरूर - haughty; सगर्व

मज्लिसी - social; सामाजिकः

मर्ज (खान) - sixth zodiac sign; षष्ठः राशि स्थानं

मर्ज्या - origin, source; प्रभवः, मूलं

महबूब - majestic; सानुभाव

मादरागार - fourth zodiac sign; चतुर्थराशि स्थानं

मालदार - rich; धनी

माल (खान) - second zodiac sign; द्वितीयराशि स्थानं

मालिक - owner; स्वामिन्

माह राशी -

माहताव - Moon; चंद्रः

मिरीख - Mars; मंगलः, भौमः

मुनोशै - friend; मित्रः

मुकरब - nearest; निकटस्थः

मुकर्रम - honoured; संमाननीयः

मुखैइल - a charitable disposition;

मुतफकिरवदाम - always worried; नित्यचिंतित

मुतफक्रिर - worried; व्यथित, चिंतित

मुतफरिक - different; various; miscellaneous; विविधाः

मुतमौवल - wealthy; rich; धनी

मुतम्मविल् - wealthy; धनी

मुफलिस - poor; indigent; निर्धन

मुरौवत (वती) - dignity; महिमन्

मुर्ताज् - Ascetic; यतिः, योगिन्

मुलुक् - Region, Kingdom; State; राज्यः

मुसाफिर् - pilgrim; यात्रिकः

मुसाहिब् - courtier; companion of a King or Noble; राजसभासद्

मुशीर - advisor, counsellor; उपदेष्ट, सचिवः

मुश्किल - trouble; कष्टं, दुखं, पीडा

मुश्तरी - Jupiter; बृहस्पति

मौत (खान) - eighth zodiac sign; अष्टमराशी स्थानं

यकी - intelligent; प्रतिभावत्

यशील - prpobably; यशीम - of a big size;

यख़्म (नहुम) खान - ninth zodiac sign ; नवमराशि स्थानं

याप्ति, याप्त (खान) यागदमे - eleventh zodiac sign; एकादश राशि स्थानं

युशन - armour; कञ्चुकः

राशिमीजान् -

रास - Rahu; राहु

राहरसन् - customs, rituals; रीति, आचारः

रुजु - But the word is probably राजा, & not रुजु which means reference

रोशन - light; प्रकाशः

लश्कर - party, soldier; troops; सैनिक पटलम्

लागर - weak; दुर्बल, अशक्त

वकार - dignity; majesty; पात्रत्वं

शरारतूपनाह - expanding protection to wicked people

शायर - poet; कविः

शाल - shawl; शाटी

शाह (खान) - tenth zodiac sign; दशमराशि स्थानं

शाहबल - endowed with royal help; राज सहाय

शिगूफुरु - probably - शिगूप्तारु meaning with blossoming beauty; extremely cheerful; अतीव शोभनीयम्

शिर्दार् - leader; नायकः

शोयुम् (खान) - third sign of the zodiac; तृतीयराशि स्थानं

शीरींसखुन् - sweet-speaking; मधुरभाषणं

शुतुर, शुतर्, शुतुर् - horse; अश्वः

सखी - of charitable disposition; cenerous; दानी

सवाब (खाना) - religious merit; पुण्य (स्थानं)

सवार - rider; अश्वारोहः

समूश - Sun; सूर्यः

सर्दारक - सर्दार, leader; नायकः

सलाही means, probably, अस्त्रधारी i.e. equipped with weapons

(बृहत्) साबरी - patience; सहिष्णुता

ससुम (बंदूं) मफान - sixth zodiac sign; षष्ठराशि स्थानं

साबर - patient; सहिष्णु

साहब -companion; master; सहचरः

साहबखर्च - spending lavishly; अर्थव्ययसाह

साहबजलाल - extremely glorious; यशस्विन्

साहबदर्द - extremely sympathetic; करुणाद्रः

साहबहिम्मत - of great courage; धैर्यवान्

साहिबी - Companionship; साहचर्यं

सितमूखुक् - tyrannical, oppressive; पीडाकर

सिपाही - soldier; सैनिकः

सिरदार - soldier; सैनिकः

सूरत् - apperance; आकृति, रूपं

सुरफितत् - rich; धनी

हज्रत - respectable; सम्माननीयः

हप्तमखान, हप्तुमखान, हप्तखान - seventh zodiac sign; सप्तमराशि स्थानं

हमल् - aries; मेषराशी

हमेशा - always; निरंतरम्

हमूज - cautious; सावधान

हमजबान - conversation; speaking the same language; संभाषणं, संवादः

हरीस - greedy; लोलुप

हासिल - fulfilled; प्राप्तः

हिर्ज - roaming about; ; विहारिन्

हिर्जगर्द - roaming about for nothing; a vagabond; परिभ्रमिन्



Appendix - B

अक्षरक्रमानुगतश्लोकसूची

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
जरदारं महबूबं सिर्दारं वा	73	13
जरमखमलमर्ज्यांजर्कशीसाहिवीभि-	37	7
जरशुतुरजवाहिर्रत्नतम्बूकनातैः	29	5
जोरावरो यशीलः खुशदाना	77	14
जोह्रा भवति ब्रिादरखाने	65	12
तँगहालो बदफेलः पापासक्तश्च	86	15
तवङ्गरश्चात्मजसौख्ययुक्स्याह्वानाग्रणी	49	9
ताले यदि स्याज्जुहलो बद्अक्लश्च	75	13
तालेवरः सत्यवचा मुसाहिब्	45	9
दर्राकोजरदारः पितृगुरुभक्तश्च	72	13
दानीश्वरः सत्यगुरुल्लपेतः खुश्री	47	9
दानीश्वरं जलीलं जनयति	80	14
दानीश्वरो मनुष्यः सुतधनधान्यैश्च	67	12
धनाधिपश्च खूबरू सखी सुबुद्धिपुङ्गरः	25	4
नरपतिकुलमान्यः संलभो वन्दनादौ	35	7
नशीबखानगः कमर्मु ईशसंज्ञकं नरम्	23	4
नापाक्जनैश्चारुगुणैरुपेतो बेतालकः	50	9
नेकीकारः सुभगः खुशरो दानी	71	13
पदकरजविराड्वै नो तनूत्थं सुखं च	30	6
पण्डितः पुरुतरदुद आर्यः	55	10
पाकः शाहब्लः स्याद्वै	89	15
पालकीजलजवाहिरफीलः संयुतो	60	11
पिसरखाने स्थितो रासः	91	16

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
साबिरः शुभतनुर्जरदारः फारशी	61	11
साहबखर्चो बदकार् कमसहश्च	74	13
साहबदर्दः कुशलः सकलकलासु	69	12
साहबदर्दो नेकःशीरींसखुनस्तवङ्गरो	85	15
साहब् जलालो मुतमौवलः(?)	48	9
साहब् सवारो जितखूबरोमा तुतारदः	39	8
सुतान्वितः सुर्रफितद्भवेन्ना युतारदः	43	8
हज्रते च खुशपीरजवांश्च खूबरो	59	11
हस्तमूखाने यदा रासः	94	16
हिर्जगर्दश्च बेतालो गुस्वरो	93	16

अथ राजयोगाध्यायः

अतारिद् विलग्ने सुखे माहताबे	6	18
आफताबे मालखाने यस्य	16	19
आयुखाने चश्मखोरा मालखाने	17	19
आयुख़ाने चश्मखोरा मालखाने	13	18
कमर् केन्द्रखाने शनिः शत्रुखाने	10	19
खजानागजाढ्यो भवेल्लश्कराढ्यो	9	18
जमीजोऽथ नक्रे शनौ मौतखाने	23	20
तृतीये भवेदाफताब्स्य पुत्रो यदा	4	18
धनस्ते कुमुद्बन्धुषष्ठे रविः स्यात्	12	19
भवेदाफतावो यदा षष्ठखाने	2	18
मिरीखोऽथवा खेशशम्तौलिखाने	11	19

2. द्वात्रिंशद्योगावली

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
जन्म (नव) भां (मां) शगते	12	23
झषे गुरुः शुक्रमहीसुताश्च लग्ने	11	23
तनुपतौ व्ययभावगते रवौ	25	25
तपनइन्दुजसिंहजलग्नगाः	5	22
तृतीये शुक्रो गुरुः (रौ) सार्द्धचारी	21	24
तृतीयपञ्चमभाग्यतथाऽऽयगे	16	23
द्विती(त) यभाग्ययमारविधूसतात	7	22
धने लाभगे राहुचन्द्रोच्चसंस्थे	15	23
धने व्यये मृत्युरिपोऽस्तगे वा	23	24
प्रालेयराशौ यदि पापखेटा	9	22
भृगुगृहे सुरराजपुरोहिते	31	25
भृगुर्ह्योजराशौ यदा कन्यकादौ	18	24
मित्रे धनस्थे यदि वा विलग्ने	3	21
यदि पराक्रमलाभगते रवौ शुभखगा	32	26
या मित्रमूर्त्योः खलु पापखेटाः	1	21
रविर्जन्मलग्नाधिपो व्योमभावे	14	23
रवौ सिंहराशौ गुरौ चापमध्ये	17	23
लग्नेश्वरो व्योमकलत्रतुर्ये	26	25
लग्नेश लाभेश अथवा(?)	33	26
लग्नाधिपो भवति भौमयुतश्च	27	25
लग्नाधिपो भौमयुतश्च रन्ध्रे	24	24
लाभे व्यये लग्नगते च दुष्टे	22	24

5. मदनाष्टक



BIBLIOGRAPHY

Adul Ghani Shaik, Contribution of Muslims to the Sanskrit Literature, Kavikulaguru Kalidas Sanskrit University, Ramtek, 2020.

Brajratnadas, *Rahiman Vilas*, Ramnarayanlal, Allahabad, 1987.

Chaudhari Jatindrabimal, *Muslim Patronage to Sanskritic Learning*, part-1, Pracyavani, Calcutta, 1954.

Chaudhari Jatindrabimal, *Khan-e-Khana and Sanskrit Learning*, Pracyavani, Varanasi, 2016.

Radhavallabh Tripathi, Sanskrit Sahitya Ko Islam Parampara ka Yogdan, Sanskrit Parishad, Dr Hari Singh Gour Vishvavidyalaya (Saugar University) Sagar.MP. 1986.

Mishra Pratap Kumar, Khankhana Abdur Raheem aur Sanskrut, Pratnakirti Prachya shodh sansthan, Varanasi.2007.

Satya Vrat Shastri, Sanskrit Studies: New Perspectives, Yash Publications, Delhi, 2007.







संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024





ISBN - 978-81-969575-2-0